Barcode : 5010010078890
Title - abhijnaanashaakuntalamuu
Author - s n simha
Language - Sanskrit
Pages - 130
Publication Year - 1940
Barcode EAN.UCC-13



२००२२

महाकवेः कालिदासस्य

अभिज्ञानशाकुन्तलम्

THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE
MYLAPORE, CHENNAI-4

PART I

Sanskrit Text, with Introduction etc.

From
T. S. SANKARAN.
117, Appar Swami Koil St.,
Mylapore, Madras-4.

Sanskrit Literature Society
BANGALORE CITY

20022

[redacted]म-साहित्य-माला Series—No. 2

॥ श्रीः ॥

महाकवेः कालिदासस्य

अभिज्ञानशाकुन्तलम्

PART I—TEXT

PUBLISHED BY

MR. S. N. SIMHA, M. A.,

FOR THE

Sanskrit Literature Society

BANGALORE CITY

All Rights Reserved.

EDITORIAL BOARD

Mr. S. N. Simha, M A.
Mr. H. K. A. Narayana Rao, B. A.
Pandit Srinivasa Rangacharya.

FIRST EDITION 1940

PRINTED BY
V. B. SOOBIAH & SONS
AT THE M. B. ELECTRIC PRINTING WORKS
BANGALORE CITY

PREFACE.

We have great pleasure to place in the hands of our readers this edition of Kalidasa's Abhijnana Sakuntalam and its English Translation, as the second and third numbers of the series of the सुलभसाहित्यमाला. The One Act Plays of Bhasa will be issued as the next number in the series

In preparing our edition of the Sakuntalam we have consulted and used many of the printed editions of the play and its translations of various scholars, to whom we are highly indebted Not to fail in our duty, we must express here, our gratitude to Mr K Narayanaswami Iyengar for the help he has rendered us in various ways, and to Mr V B Sreekantiah of Messrs. V. B Soobbiah & Sons, for his kind co-operation which enabled us to publish the works in quick succession

S. N. Simha,

For Editors.

From

INTRODUCTION

Kalidasa's Date : Kalidasa probably lived in the first B. C. The date is approximate, as it has not yet been to fix it up definitely. That is why, if Dr. Peterson he "Kalidasa stands near the beginning of the Christia indeed, he does not overtop it", Dr. Kern places him latter half of the 6th cent. A. D.

His Life : There are only a few tantalising legends have to speak about the life of our poet and we have that none of these is reliable If one legend makes h contemporary of Bhavabhuti and Dandin, another mal the court poet of Bhojaraja of Dhara. But, the traditio he was one of the '*Nine Gems*'* of Vikramaditya's court to have some truth about it Of course some scholars rejected even this as totally baseless but many are n to believe that Kalidasa's patron must have been Vikrama It is not unlikely that Kalidasa wanted to pay his tribu his patron in the title of his play *Vikramorvasiyam* again, there have been several Vikramadityas and hence tradition by itself does not help to fix the date of Kali One King Vikramaditya founded the era known after which commences with 57 B. C. It is very likely that King was Kalidasa's patron.

We can gather some information about Kalidasa's from his own writings. His repeated reference to Ujj indicates that he must have spent at least a part of his lif the city. His dwelling upon the charms of the city in *Meghadutam* makes clear that he loved the city much. I description of the *Tour* about the Whole of India and e

---

*धन्वन्तरिक्षपणकामरसिंह शङ्कु वेतालभट्ट घटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपसभायां रत्नानि वै विक्रमार्कस्य॥

nto regions beyond the borders of India, in the *Raghuvamsam*, ntur akes any one believe that Kalidasa himself must have made sibl uch a grand tour Mountains seem to have impressed him th eeply As acutely observed by a critic, he is the only Sanskrit i, t Poet who has described certain Kasmiran flower.

th

luc sw the hm ha m- ve ed a to ul is i. ,

There cannot be any doubt that Kalidasa had extensive education in the traditional metres rhetoric, dramatic theory and the science of Grammar 'the chief of all sciences. Besides the knowledge of Vedas and astronomy seems to have been presented in the profound and subtle systems of philosophy It is *Abhijnanasakuntalam* that is mystic, its *Raghuvamsam* Vishnu It the poem to Vishnu in the latter work explained Vedanta monism, the poem to Brahma in the former work expresses the dualism of the Sankhyas. The Buddhism and Jainism are so mentioned here and there Therefore we may observe that in matter of religion, philosophy, intellectual attainments of an educated mind.

His works More than forty works are generally attributed to Kalidasa but critics choose Only seven of them as his These works are

1 3. *Three dramas* 1 Sakuntalam 2. Vikramorvasiyam and 3 Malavikagnimitram

4 5 *Two Mahakavyas* 4 Kumarasambhavam

6 *One Khanda Kavya* -Meghadutam

7 [illegible] Not yet discovered but known by a quotation in the Alankarasastra of Kshemendra.

Another descriptive poem Rtusamhara is accepted by some as the work of Kalidasa

Kalidasa's Poetry : " Sweetest Sakuntala " was th
of the great critic and poet Goethe. So much
enraptured by the poetic genius of Kalidasa that I
Sakuntala —

"Wouldst thou the young year's blossom
and the fruits of its decline
And all by which the soul is charmed
enraptured, feasted, fed '
Would-st thou the earth and heaven itself
in one sole name combine '
I name thee, O Sakuntala,
and all at once is said "

Many of the foreign critics such as Sir Willian
and Sir Monier Williams, have raised Kalidasa as the
Shakespeare and some have even gone to the extent of
him above Shakespeare. For instance, this is wha
A. W. Ryder says —"I have elected to end at the wo
balance in Kalidasa's character, between which he
himself equally at home in a palace and in a wilde
I know not with whom to compare him in this even S
peare, for all his natural insight into natural beauty,
mainly a poet of the human heart That can be hardly
of Kalidasa nor can it be said that he is primarily a po
natural beauty The two characters unite in him, it
almost be said, chemically"

In the translation of the same professor, this is
Bana, the celebrated Sanskrit novelist says about Kali
verse,—

'Where find a soul that does not thrill
In Kalidasa's verse to meet
The smooth inevitable lines
Like blossom clusters honey sweet '

" [illegible] " has been a very common saying
appreciation of Kalidasa' numerous and homely sim

dera describes Kalidasa as the grace of Poetry;—'कालिदासो
as [illegible]:'. It is this grace of Kalidasa's composition that
ays [illegible]uced the celebrated critic Schlegel assign for him a very
[illegible] position amongst the galaxy of the "Sons of Song'

Kalidasa is undoubtedly "the brightest star in the firma-
[illegible]nt of Indian poetry'. 'The richness of his creative fancy,
[illegible]d his skill in expressing tender sentiment and sympathy
[illegible]h nature gives him a very high place among the world's
[illegible]matic poets'.

The story of Sakuntala : The drama is about the romance of
[illegible]g Dushyanta and Sakuntala daughter of a celestial nymph.
one [illegible]hile hunting in a forest, the king sees Sakuntala loves her
li[illegible]l marries her. Afterwards he returns to his capital, pro-
kis[illegible]sing Sakuntala that he will send for her soon, but, he
for[illegible]gets all about her in consequence of a curse of the angry
fu[illegible]ge Durvasas on her. The hermit knows the foster father
m[illegible] Sakuntala however sends her to her husband who fails
s[illegible] recognize her. A long separation ensues, till at last is
[illegible]covered the ring which the King had given Sakuntala in the
r[illegible]rest, but which was later swallowed by a fish. Finally, the
il[illegible]vers are reunited after some time, on a heavenly mountain
[illegible] which Sakuntala had resorted.

The highest place is assigned to Sakuntala among lite-
[illegible]ry works, and there is much truth in the observation.—

[illegible]

The play consists of seven acts of which the first four pass
[illegible] forest hermitage the fifth and the sixth pass in the king's
[illegible]alace, and the last on a heavenly mountain. The duration
[illegible]f time is perhaps seven years.

* These four stanzas are IV 6, 9, 18 and 19.

From

DRAMATIS PERSONÆ.

Male—

दुष्यन्तः—King of Hastinapura. (The hero of the

सूतः The King's charioteer.

विदूषकः (माढव्यः) The king's companion by name V

सेनापतिः (सेनानी) The general of the army of the

सर्वदमनः The king's son.

सोमरातः—The King's preceptor.

कण्वः (महर्षिः) Sakuntala's foster father.

छात्राः, छात्रौ, छात्रः, शिष्यौ, शिष्याः Pupils of K:

कञ्चुकी (प्रतिहारः)—The King's Chamberlain.

रक्षकाः, अनुचराः The King's servants

श्यालः—The King's brother in law

रक्षकौ, पुरुषौ—Two guards

मातलिः—Indra's charioteer.

मारीचः—A sage.

धीवरः—A fisherman

वैतालिकौ—Two bards

सूत्रधारः—Stage Manager

Durvasa the angry sage, etc

Female—

शकुन्तला—Dushyanta's wife and Kanva's adopted dau

अनसूया, प्रियंवदा Sakuntala's friends

गौतमी—A female ascetic

चतुरिकाः, परभृतिकाः, मधुकरिकाः—Maid servants of the king,

अप्सरा—A nymph.

अदितिः Wife of Kashyapa (Maricha)


प्रतीहारी—Portress

नटी—An actress

वंचना, मेनका etc.

अथ

अभिज्ञानशाकुन्तलम्



या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रसन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥१॥

(नान्द्यन्ते)

सूत्रधारः—(नेपथ्याभिमुखमवलोक्य ।) आर्ये यदि नेपथ्य-विधानमवधीरितमितस्तावदागम्यताम् ।

(प्रविश्य ।) **नटी**—[1]आर्यपुत्र इयमस्मि ।

सूत्रधारः—आर्ये अभिरूपभूयिष्ठा परिषदियम् । अद्य खलु कालिदासग्रथितवस्तुना नवेनाभिज्ञानशाकुन्तलाख्येन नाटकेनोपस्थातव्यमस्माभिः । तत्प्रतिपात्रमाधीयतां यत्नः ।

नटी—सुविहितप्रयोगतयार्यस्य न किमपि परिहास्यते ।

सूत्रधारः—आर्ये कथयामि ते भूतार्थम् ।

आ परितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥ २ ॥

---

1. आर्यपुत्रोऽयमस्मि ।

[illegible] परिहास्यामि ।

नटी—[1]आर्य एवमेतत् । अनन्तरकरणीयमार्य आज्ञापयतु ।

सूत्रधारः—किमन्यदस्याः परिषदः श्रुतिप्रसादनतः । तदिममेव तावदचिरप्रवृत्तमुपभोगक्षमं ग्रीष्मसमयमधिकृत्य गीयताम् । संप्रति हि,

सुभगसलिलावगाहाः पाटलसंसर्गसुरभिवनवाताः ।
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः ॥ ३ ॥

नटी—[2]तथा । (इति गायति ।)

ईषदीषच्चुम्बितानि भ्रमरैः सुकुमारकेसरशिखानि ।
अवतंसयन्ति दयमाना प्रमदाः शिरीषकुसुमानि ॥४॥

सूत्रधारः—आर्ये साधुगीतम् । अहो रागबद्धचित्तवृत्तिरालिखित इव सर्वतो रङ्गः । तदिदानीं कतमत्प्रकरणमाश्रित्यैनमाराधयामः ?

नटी—[3]नन्वार्यमिश्रैः प्रयोगमेवाज्ञप्तमभिज्ञानशाकुन्तलं नामापूर्वं नाटकं प्रयोगे अधिक्रियतामिति ।

सूत्रधारः—आर्ये सम्यगनुबोधितोऽस्मि । अस्मिन्क्षणे विस्मृतं खलु मया तत् । कुतः,

तत्रास्मि गीतरागेण हारिणा प्रसभं हृतः ।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा ॥ ५ ॥

(इति निष्क्रान्तौ ।)

प्रस्तावना ।

---

1. [illegible] 2. [illegible]
3. [illegible]
   [illegible] ॥ ४ ॥
4. [illegible]

(ततः प्रविशति मृगानुसारी सशरचापहस्तो राजा रथेन सूतश्च ।)

सूतः—(राजानं मृगं चावलोक्य ।) आयुष्मन,

कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके ।
मृगानुसारिणं साक्षात्पश्यामीव पिनाकिनम् ॥ ६ ॥

राजा—सूत दूरमनुसारितो मारीच एवमाकृष्टः । अयं पुनरिदानीमपि

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥७॥

सविस्मयम्,) तदेष कथमनुपतन एव मे प्रयत्नप्रेक्षणीयः संवृत्तः !

सूतः—आयुष्मन् उद्धूतिनी भूमिरिति मया रश्मिसंयमनाद्रथस्य मन्दीकृतो वेगः । तेन मृग एष विप्रकृष्टान्तरः संवृत्तः । संप्रति समदेशवर्तिनस्ते न दुरापदो भविष्यति ।

राजा—तेन हि मृगसन्नामभीषवः ।

सूतः—यदाज्ञापयत्यायुष्मान् । (रथवेगं निरूप्य ।) आयुष्मन्,

इय पश्य ।

मुक्तेषु रश्मिषु निरायतपूर्वकाया
निष्कम्पचामरशिखा निभृतोर्ध्वकर्णाः
आत्मोद्धतैरपि रजोभिरलक्ष्यनीया
धावन्त्यमी मृगजवाक्षमयेव रथ्याः ॥ ८ ॥

—सत्यम् । अतीत्य हरितो हरींश्च वर्तन्ते वाजिनः । तथा हि ।

यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां
यदर्धे विच्छिन्नं भवति कृतसंधानमिव तत् ।
प्रकृत्या यद्वक्रं तदपि समरेखं नयनयो-
र्न मे दूरे किंचित्क्षणमपि न पार्श्वे रथजवात् ॥ ९ ॥
मृत पश्यैनं व्यापाद्यमानम् । (इति शरसंधानं नाटयति ।)

(नेपथ्ये) भो भो राजन्, आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः ।

सूतः—(आकर्ण्यावलोक्य च ।) आयुष्मन्, अस्य खलु ते बाणपातपथवर्तिनः कृष्णसारस्यान्तरे तपस्विन उपस्थिताः ।

राजा—(ससंभ्रमम् ।) तेन हि प्रगृह्यन्तां वाजिनः ।

सूतः—तथा । (इति रथं स्थापयति ।)

(ततः प्रविशत्यात्मना तृतीयो वैखानसः ।)

वैखानसः—(हस्तमुद्यम्य ।) राजन्, आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः ।

*(न खलु न खलु बाणः संनिपात्योऽयमस्मि-
न्मृदुनि मृगशरीरे पुष्पराशाविवाग्निः ।
क्व बत हरिणकानां जीवितं चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते ॥१०॥)
तत्साधुकृतसंधान प्रतिसंहर सायकम् ।
आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि ॥ ११ ॥

राजा—एष प्रतिसंहृतः । (इति यथोक्तं करोति ।)

वैखानसः—महशमेतत्पुरुवंशप्रदीपस्य भवतः ।

जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव ।
पुत्रमेवंगुणोपेतं चक्रवर्तिनमाप्नुहि ॥ १२ ॥

इतरौ—(बाहू उद्यम्य।) सर्वथा चक्रवर्तिनं पुत्रमासादय।

राजा—(सप्रणामम्।) प्रतिगृहीतं ब्राह्मणवचनम्।

वैखानसः—राजन्, समिदाहरणाय प्रस्थिता वयम्। एष खलु वस्य कुलपतेरनुमालिनीतीरमाश्रमो दृश्यते। न चेदन्यकार्याति- ः प्रविश्य प्रतिगृह्यतामातिथेयः सत्कारः। अपि च;

रम्यास्तपोधनानां प्रतिहतविघ्नाः क्रियाः समवलोक्य।
ज्ञास्यसि कियद्भुजो मे रक्षति मौर्वीकिणाङ्क इति ॥१३॥

राजा—अपि संनिहितोऽत्र कुलपतिः?

वैखानसः—इदानीमेव दुहितरं शकुन्तलामतिथिसत्काराय नियुज्य मस्याः प्रतिकूलं शमयितुं सोमतीर्थं गतः।

राजा—भवतु। तामेव द्रक्ष्यामि। सा खलु विदितभक्तिं मां हर्षैः कथयिष्यति।

वैखानसः—साधयामस्तावत्। (इति सशिष्यो निष्क्रान्तः।)

राजा—सूत चोदयाश्वान्। पुण्याश्रमदर्शनेन तावदात्मानं पुनीमहे।

सूतः—यदाज्ञापयत्यायुष्मान्। (इति भूयो रथवेगं निरूपयति।)

राजा—(समन्तादवलोक्य।) सूत अकथितोऽपि ज्ञायत एव थायमाश्रमाभोगस्तपोवनस्येति।

सूतः—कथमिव?

राजा—किं न पश्यसि भवान्? इह हि,

नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।
श्यामाकोपगमादभिन्नगतयः शब्दं सहन्ते मृगा-
स्तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः ॥१४॥

सूतः—सर्वमुपपन्नम् ।

राजा—(स्तोकमन्तरं गत्वा ।) तपोवननिवासिनामुपरोधो मा भूत् इहैव रथं स्थापय यावदवतरामि ।

सूतः—धृताः प्रग्रहाः । अवतरत्वायुष्मान् ।

राजा—(अवतीर्य) सूत, विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम इदं तावद्दूष्यताम् । (इति सूतस्याभरणानि धनुश्चोपनीयार्पयति ।) सूत यावदाश्रमवासिनः प्रत्यवेक्ष्याहमुपावर्ते तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः

सूतः—तथा । (इति निष्क्रान्तः ।)

राजा—(परिक्रम्यावलोक्य च ।) इदमाश्रमद्वारम् । यावत्प्रविशामि

(प्रविश्य, निमित्तं सूचयन् ।)

शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य ।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र ॥१५॥

(नेपथ्ये ।) [1]इत इतः सख्यौ ।

राजा—(कर्णं दत्त्वा ।) अये दक्षिणेन वृक्षवाटिकामालाप इव श्रूयते । यावदत्र गच्छामि । (परिक्रम्यावलोक्य च ।) अये एताः तपस्विकन्यकाः स्वप्रमाणानुरूपैः सेचनघटैर्बालपादपेभ्यः पयो दातुमित एवाभिवर्तन्ते । (निपुणं निरूप्य ।) अहो, मधुरमासां दर्शनम् !

युक्तान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य ।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः ॥१६॥

यावदिमां छायामाश्रित्य प्रतिपालयामि । (इति विलोकयन्स्थितः ।)

(ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला ।)

शकुन्तला—[1]इत इतः सख्यौ ।

अनसूया—[1]हला शकुन्तले, त्वत्तोऽपि तातकाश्यपस्याश्रमवृक्षकाः प्रतरा इति तर्कयामि । येन नवमालिकाकुसुमपेलवापि त्वमेतेषामा-वालपूरणे नियुक्ता ।

शकुन्तला—[2]न केवलं तातनियोग एव । अस्ति मे सोदरस्नेहो-येतेषु । (इति वृक्षसेचनं निरूपयति ।)

राजा—कथमियं सा कण्वदुहिता ! असाधुदर्शी खलु तत्रभवा-काश्यपो य इमामाश्रमधर्मे नियुङ्क्ते !

इदं किलाव्याजमनोहरं वपु-
स्तपःक्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति ॥ १७ ॥

भवतु; पादपान्तर्हित एव विश्रब्धं तावदेनां पश्यामि । (इति तथाकरोति।)

शकुन्तला—[3]सखि अनसूये, अतिपिनद्धेन वल्कलेन प्रियंवदया मेयन्त्रितास्मि । शिथिलय तावदेतत् ।

अनसूया—[4]तथा । (इति शिथिलयति ।)

प्रियंवदा—[5](सहासम् ।) अत्र पयोधरविस्तारयित्र आत्मनो त्रैवनमुपालभस्व । (मां किमुपालभसे !)

1. हला सउन्दले एवसोवि तादकस्सवस्स अस्समस्स एव्व अहिअरए तक्केमि ।
जेण णोमालिआकुसुमपेलवावि तुमं दाणिं आलवालपूरणे णिउत्ता ।
2. ण केवलं तादणिओओ एत्थ । अत्थि मे सोदरसिणेहोवि एदेसु ।
3. सहि अणसूए अदिपिणद्धेण वक्कलेण पिअवदाए णिअन्तिदम्हि । सिढिलेहि दाव णं ।
4. तह ।
5. एत्थ पओहरुव्वित्थारइत्तिअ अत्तणो जोव्वणं उवालहह ।
(सहि किमुवालभामि ।)

राजा—कामममनुरूपमस्या वपुषो वल्कलं न पुनरलंकारश्रियं पुष्यति । कुतः,

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥१८॥

शकुन्तला—[1](अग्रतोऽवलोक्य) एष वातेरितपल्लवाङ्गुलीभिस्त्वरयतीव मां केसरवृक्षकः यावदेनं संभावयामि । (इति परिक्रामति ।)

प्रियंवदा—हला शकुन्तले अत्रैव तावन्मुहूर्तं तिष्ठ यावत्त्वयोपगतया लतासनाथ इवायं केसरवृक्षकः प्रतिभाति ।

शकुन्तला—[2]अतः खलु प्रियंवदास्मि त्वम् !

राजा—प्रियमपि तथ्यमाह (शकुन्तलां) प्रियंवदा । अस्याः खलु

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू ।
कुसुममिव लोभनीयं यौवनमङ्गेषु संनद्धम् ॥१९॥

अनसूया—[3]हला शकुन्तले इयं स्वयंवरसूः सहकारस्य त्वया कृतनामधेया वनज्योत्स्नेति नवमालिका । एनां विस्मृतासि ?

शकुन्तला—[4]तदात्मानमपि विस्मरिष्यामि। (लतामुपेत्यावलोक्य च) हला, रमणीये खलु काल एतस्य चूतस्य दयितेन भ्रमरयुगलेन योक्तव्यः संवृत्तः ।

1. एसो वादेरिदपल्लवङ्गुलीहिं तुवरेदि वि मं केसरअओ। जाव णं संभावेमि।
2. हला सउन्दले । एत्थ एव्व दाव मुहुत्तअं चिट्ठ, जाव तुए उवगदाए विअ लदाए सणाधो विअ एसो केसरअओ पडिहादि।
3. अले किमु पियंवदा णिहुदा।
4. हला सउन्दले इअं सअंवरसूः सहआरस्स तुए विदिण्णणामधेआ वणजोण्हा णोमालिआ। ण विस्सरिदासि।

नवकुसुमयौवना वनज्योत्स्ना स्निग्धपल्लवतयोपभोगक्षमः सहकारः ।

(इति पश्यन्ती तिष्ठति ।)

प्रियंवदा—'अनसूये, जानासि 'किं शकुन्तला वनज्योत्स्नामति-
।त्रं पश्यती'ति ?

अनसूया—'न खलु विभावयामि । कथय ।

प्रियंवदा—''यया वनज्योत्स्नानुरूपेण पादपेन संगता, अपि
नामैवमहमप्यात्मनोऽनुरूपं वरं लभेये'ति ।

शकुन्तला—'एष नूनं तवात्मगतो मनोरथः । (इति कलशमावर्जयति।)

राजा—अपि नाम कुलपतेरियमसवर्णक्षेत्रसंभवा स्यात् ! अथ वा
।कृतं संदेहेन ।

असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः ।
सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ॥२०॥

तथापि तत्त्वत एनामुपलप्स्ये ।

शकुन्तला—(ससंभ्रमम् ।) 'अम्मो! मलिदमेकसंभ्रमोद्वृत्तो नवमा-
लिकामुज्झित्वा वदनं मे मधुकरोऽभिवर्तते । (इति भ्रमरबाधां रूपयति ।)

राजा—(सस्पृहम् ।)

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः ।

मिहुणस्स वह अरं। मणुत्तो। णवकुसुमजोव्वणा वणजोण्हिणा, सिणिद्धपल्लवदाए. उवभोअक्खमो महआरं। 1. अणसूए, जाणासि किं सउन्दला वणजोण्हिणं अदिमेत्तं पेक्खदित्ति। 2 ण खलु विभावेमि। कहेहि। 3. जह वणजोण्हिणा अणुरूवेण पादवेण संगदा, अवि णाम एव्वं वि अत्तणो अणुरूवं वरं लहेअंत्ति। 4. एसो णूणं तुह अत्तणदो मणोरहो। 5. अम्मो।

[illegible] मे महअरो अहिवट्टइ ।

करौ व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती ॥२१॥

शकुन्तला—[1]न एष धृष्टो विरमति। अन्यतो गमिष्यामि (पदान्तरे स्थित्वा, स दृष्टिक्षेपम्) कथमितोऽप्यागच्छति! हला, परित्रायेथां मामनेन दुर्विनीतेन मधुकरेणाभिभूयमानाम्!

उभे—(सस्मितम्।) [2]के आवां परित्रातम्? दुष्यन्तमाक्रन्द राजरक्षितव्यानि तपोवनानि नाम!

राजा—अवसरोऽयमात्मानं प्रकाशयितुम्। न भेतव्यं न भेतव्यम्—(इत्यर्धोक्ते स्वगतम्।) राजभावस्त्वभिज्ञातो भवेत्। भवतु, एवं तावदभिधास्ये।

शकुन्तला—(पदान्तरं स्थित्वा, सदृष्टिक्षेपम्।) [3]कथमितोऽपि मा मामनुसरति!

राजा—(सत्वरमुपसृत्य)

कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम्
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु ॥ २२ ॥

(सर्वा राजानं दृष्ट्वा किंचिदिव सम्भ्रान्ताः।)

अनसूया—[4]आर्य न खलु किमप्यत्याहितम्। नौ प्रियसखी मधुकरेणाभिभूयमाना कातरीभूता। (इति शकुन्तलां दर्शयति।)

राजा—(शकुन्तलाभिमुखो भूत्वा।) अपि तपो वर्धते?

(शकुन्तला साध्वसादवचना तिष्ठति।)

---

1. [1]ण एसो धिट्ठो विरमदि। अण्णदो गमिस्सं। कधं इदो वि आअच्छदि? हला, परित्तायध मं इमिणा दुव्विणीदेण महुअरेण अहिभूअमाणं।
2. [2]के आवं परित्तादुं। दुस्सन्तं अक्कन्द। राअरक्खिदव्वाइं तवोवणाइं णाम।
3. [3]कधं इदोवि म अणुसरदि। 4. [4]अज्जा ण खलु किं वि अवज्झादिदं। इअ

अनसूया—[1]इदानीमतिथिविशेषलाभेन । हला शकुन्तले, गच्छो-दकम् । फलमिश्रमर्घ्यमुपहर । इदं पादोदकं भविष्यति ।

राचा—भवतीनां मृदुतयैव गिरा कृतमातिथ्यम् ।

प्रियंवदा—[2]तेन ह्यस्यां प्रच्छायशीतलायां सप्तपर्णवेदिकायां मुहूर्तमुपविश्य परिश्रमविनोदं करोत्वार्यः ।

राजा—नूनं यूयमप्यनेन कर्मणा परिश्रान्ताः ।

अनसूया—[3]हला शाकुन्तले उचितं नः पर्युपासनमतिथीनाम् । तत्रोपविशामः । (इति सर्व उपविशन्ति ।)

शकुन्तला—(आत्मगतम्) [4]किं नु खल्विमं प्रेक्ष्य तपोवनविरोधिनो विकारस्य गमनीयास्मि संवृत्ता !

राजा—(सर्वा विलोक्य) अहो, समवयोरूपरमणीयं भवतीनां सौहार्दम् !

प्रियंवदा—(जनान्तिकम् ।) [5]अनसूये, को नु खल्वेष चतुरगम्भीराकृतिर्मधुरं प्रियमालपन्प्रभाववानिव लक्ष्यते ?

अनसूया—[6]सखि, ममाप्यस्ति कौतूहलम् । पृच्छामि तावदेनम् । (प्रकाशम् ।) आर्यस्य मधुरालापजनितो विस्रम्भो मां मन्त्रयते कुतम

---

1. णाणि अदिहिविसेसलाहेण । हला सउन्दले गच्छ उडअं । फलमिस्सं अग्घं उवहर । इदं पादोदअं भविस्सदि ।
2. तेण हि इमस्सिं पच्छाअसीअलाए सत्तवण्णवेदिआए मुहुत्तअं उवविसिअ परिस्समविणोदं करेदु अज्जो ।
3. हला सउन्दले उइदं णो पज्जुवासणं अदिहिणं एत्थ उवविसह्म ।
4. किणु क्खु इमं पेक्खिअ तवोवणविरोहिणो विआरस्स गमणीआह्मि संवुत्ता ।
5. अणसूए, को णु क्खु एसो चउरगम्भीराकिदी महुरं पिअं आलवन्तो पहाववन्तो विअ लक्खीअदि ।
6. सहि मम वि अत्थि कोदूहलं । पुच्छिस्सं दाव णं । अज्जस्स महुरालावजणिदो वीसम्भो मं मन्तावेदि कदमो अज्जेण राएसिवंसो [illegible] कदमो वा विरहपज्जुस्सुअजणो किदो देसो किंणिमित्तं वा

आर्येण राजर्षिवंशोऽलंक्रियते, कतमो वा विग्रहपर्युत्सुकजनः कृतो देशः किंनिमित्तं वा सुकुमारतरोऽपि तपोवनगमनपरिश्रमस्यात्मा पदमुपनीतः ।

शकुन्तला—(आत्मगतम्।) [1]हृदय मोत्ताम्य । एषा त्वया चिन्तितान्यनसूया मन्त्रयते ।

राजा—(आत्मगतम्।) कथमिदानीमात्मानं निवेदयामि, कथं वात्मापहारं करोमि । भवतु । एवं तावदेनां वक्ष्ये । (प्रकाशम्।) भवति यः पौरवेण राज्ञा धर्माधिकारे नियुक्तः सोऽहमविघ्नक्रियोपलम्भाय धर्मारण्यमिदमायातः ।

अनसूया—[2]सनाथा इदानीं धर्मचारिणः ।

(शकुन्तला शृङ्गारलज्जां रूपयति।)

सख्यौ—(उभयोराकारं विदित्वा, जनान्तिकम्।) [3]हला शकुन्तले, यद्यत्राद्य तातः संनिहितो भवेत् !

शकुन्तला—[4]ततः किं भवेत् !

सख्यौ—[5]इमं जीवितसर्वस्वेनाप्यतिथिविशेषं कृतार्थं करिष्यति ।

शकुन्तला—[6]युवामपेतम् । किमपि हृदये कृत्वा मन्त्रयेथं । न युवयोर्वचनं श्रोष्यामि ।

राजा—वयमपि तावद्भवत्योः सखीगतं किमपि पृच्छामः ?

सख्यौ—[7]आर्य, अनुग्रह इवेयमभ्यर्थना ।

सुउमारदरो वि तवोवणगमणपरिस्समस्स अत्ता पदं उवणीदो । 1. हिअअ मा उत्तम्म । एसा तुए चिन्तिदाइ अणसूआ मन्तेदि । 2. सणाहा दाणिं धम्मआरिणो । 3. हला सउन्दले जइ एत्थ अज्ज तादो सण्णिहिदो भवे । 4. तदो किं भवे । 5. इमं जीविदसव्वस्सेण वि अदिहिविसेसं किदत्थं करिस्सदि । 6. तुम्हे भवेह । किं वि हिअएण करिअ मन्तेह । ण वो वअणं सुणिस्सं । 7. अज्ज आणवेदु किं [illegible]

राजा---भगवान्काश्यपः शाश्वते ब्रह्मणि स्थित इति प्रकाशः । यं च वः सखी तदात्मजेति कथमेतत् ?

अनसूया—[1]शृणोत्वार्यः । अस्ति कोऽपि कौशिक इति गोत्रनाम्नो महाप्रभावो राजर्षिः ।

राजा—अस्ति । श्रूयते ।

अनसूया—[2]तमावयोः प्रियसख्याः प्रभवमवगच्छ । तेन उज्झितायाः शरीरसंवर्धनादिभिस्तातकाश्यपोऽस्याः पिता ।

राजा—उज्झितशब्देन जनितं मे कौतूहलम् । आमूलाच्छ्रोतुमिच्छामि ।

अनसूया—[3]शृणोत्वार्यः । गौतमीतीरे पुरा किल तस्य राजर्षेरग्रेऽपि वर्तमानस्य किमपि जातशङ्कैर्दैवैर्मेनका नामाप्सराः प्रेषिता नियमविघ्नकारिणी ।

राजा—अस्त्येतदन्यसमाधिभीरुत्वं देवानाम् ।

अनसूया—[4]ततो वसन्तोदार (°वसन्तावतार°) समये तस्या उन्मादयितृ रूपं प्रेक्ष्य— — (इत्यर्धोक्ते लज्जया विरमति ।)

राजा—परस्ताज्ज्ञायत एव । सर्वथाप्सरःसंभवैषा ।

अनसूया—[5]अथ किम् ।

राजा—उपपद्यते ।

---

1. सुणादु अज्जो । अत्थि को वि कोसिओत्ति गोत्तणामहेओ महाप्पहावो राएसी ।
2. तं णो पिअसहीए पहवं अवगच्छ । तेण उज्झिआए सरीरसंवड्ढणादिहिं तादकस्सवो मे पिदा । 3. सुणादु अज्जो । गोदमीतीरे पुरा किल तस्स राएसिणो उग्गे तवम्मि वट्टमाणस्स किवि जादसङ्केहि देवेहि मेणआ णाम अच्छरा पेसिदा णिअमविग्घकारिणी । 4. तदो वसन्तोदारसमए से उम्मादइत्तअं

मानुषीषु कथं वा स्यादस्य रूपस्य संभवः ।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् ॥ २३ ॥

(शकुन्तलाधोमुखी तिष्ठति ।)

राजा—(आत्मगतम् ।) लब्धावकाशो मे मनोरथः । किं तु सख्याः परिहासोदाहृतां वरप्रार्थनां श्रुत्वा धृतदैधीभावकातरं मे मनः ।

प्रियंवदा—(सस्मितं शकुन्तलां विलोकय नायकाभिमुखी भूत्वा :) [1]पुनरपि वक्तुकाम इवार्यः ।

(शकुन्तला सखीमङ्गुल्या तर्जयति ।)

राजा—सम्यगुपलक्षितं भवत्या । अस्ति नः सच्चरितश्रवणलोभादन्यदपि प्रष्टव्यम् ।

प्रियंवदा—[2]अलं विचार्य । अनियन्त्रणानुयोगस्तपस्विजनो नाम !

राजा—इति तं ज्ञातुमिच्छामि ।

वैखानसं किमनया व्रतमाप्रदाना-
द्व्यापाररोधि मदनस्य निषेवितव्यम् ।
अत्यन्तमेव मदिरेक्षणवल्लभाभि-
राहो निवत्स्यति समं हरिणाङ्गनाभिः ॥ २४ ॥

प्रियंवदा—[1]आर्य धर्मचरणेऽपि परवानात्मजनः । गुरुः पुनरस्या अनुरूपवरप्रदाने संकल्पः ।

राजा—(आत्मगतम् ।) न दुरन्वयं खलु प्रार्थना !

भव हृदय साभिलाषं संप्रति संदेहनिर्णयो जातः ।
आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम् ॥ २५ ॥

1. पुणो वि वत्तुकामो विअ अज्जो ।
2. अलं विआरेण । अणिअन्तणाणुओगो तवस्सिअणो णाम ।

शकुन्तला—(सरोषमिव) [1]अनसूये गमिष्याम्यहम् ।

अनसूया—[2]किं निमित्तम् ?

शकुन्तला—[3]इमामसंबद्धप्रलापिनीं प्रियंवदामार्यायै गौतम्यै निवेदयिष्यामि ।

अनसूया—[4]सखि न युक्तमकृतमत्कारमतिथिविशेषं विसृज्य स्वच्छन्दतो गमनम् ।

(शकुन्तला न किंचिदुक्त्वा प्रस्थितैव ।)

राजा—(प्रहीतुमिच्छन्निगृह्यात्मानम् : आत्मगतम् ।) अहो चेष्टा-प्रतिरूपिका कामिजनमनोवृत्तिः ! अहं हि ;

अनुयास्यन्मुनितनयां सहसा विनयेन वारितप्रसरः ।
स्थानादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः ॥२६॥

प्रियंवदा—(शकुन्तलां निरुध्य ।) [5]हला न ते युक्तं गन्तुम् ।

शकुन्तला—(सभ्रभङ्गम् ।) [6]किं निमित्तम् ?

प्रियंवदा—[7]वृक्षसेचने द्वे धारयसि मे । एहि तावत् । आत्मानं मोचयित्वा ततो गमिष्यसि । (इति बलादेनां निवर्तयति ।)

राजा—भद्रे वृक्षसेचनादेव परिश्रान्तामत्रभवतीं लक्षये । तथाह्यस्याः

स्रस्तांसावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणा-
द्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः ।

1. अणसूए, गमिस्सं अहं ।
2. किं णिमित्तं ?
3. इमं असंबद्धप्पलाविणिं पियंवदं अज्जाए गोदमीए णिवेदइस्सं ।
4. णहि ण जुत्तं अकिदसक्कारं अदिहिविसेसं विसज्जिअ सच्छन्ददो गमणं ।
5. हला ण दे जुत्तं गन्तुं ।
6. किंणिमित्तं ?
7. अत्ताणं मोचिअ तदो गमिस्ससि ।

बद्धं कर्णशिरीषरोधि वदने घर्माम्भसां जालकं
बन्धे स्रंसिनि चैकहस्तयमिताः पर्याकुला मूर्धजाः ॥२९

तदहमेनामपनृणां करोमि । (इत्यङ्गुलीयं दातुमिच्छति ।)
(उभे नाममुद्राक्षराण्यनुवाच्य परस्परमवलोकयतः ।)

राजा—अलमस्मानन्यथा संभावय । राज्ञः परिग्रहोऽयमिति गच्छ पुरुषं मामवगच्छ ।

प्रियंवदा—[1]तेन हि नार्हत्येतदङ्गुलीयकमङ्गुलीवियोगम् । आर्यमनुकम्पितनार्येण । अथवा महाराजेन । गच्छेदानीम् ।

शकुन्तला—(आत्मगतम् ।) [2]यद्यात्मनः प्रभविष्यामि । (प्रकाशम् ।) का त्वं विस्रष्टव्यस्य गृह्यस्य वा ?

राजा—(शकुन्तलां विलोक्य, आत्मगतम्) किं नु खलु यथा वयमस्यामेवमियमप्यस्मान्प्रति स्यात् । अथ वा लब्धावकाशा मे प्रार्थना । कुतः ;

वाचं न मिश्रयति यद्यपि मद्वचोभिः
कर्णं ददात्यभिमुखं मयि भाषमाणे ।
कामं न तिष्ठति मदाननसंमुखीना
भूयिष्ठमन्यविषया न तु दृष्टिरस्याः ॥ २८ ॥

(नेपथ्ये ।) भो भोस्तपस्विनः संनिहितास्तपोवनरक्षायै भवत । प्रत्यासन्नः किल मृगयाविहारी पार्थिवो दुष्यन्तः !

---

1. तेन हि नार्हत्येतदङ्गुलीयकमङ्गुलीवियोगम् । अनुकम्पितनार्येण दाक्षिण्यवता । अथवा महाराजेन, मदनुकम्पनया संभावनेन । अथवा महाराजेन

तुरगखुरहतस्तथा हि रेणुर्विटपविषक्तजलार्द्रवल्कलेषु ।
पतति परिणतारुणप्रकाशः शलभसमूह इवाश्रमद्रुमेषु ॥२९॥

अपि च ।

तीव्राघातप्रतिहततरुस्कन्धलग्नैकदन्तः
पादाकृष्टव्रततिवलयासङ्गसंजातपाशः ।
मूर्तो विघ्नस्तपस इव नो भिन्नसारङ्गयूथो
धर्मारण्यं प्रविशति गजः स्यन्दनालोकभीतः ॥ ३० ॥

(सर्वाः कर्णं दत्त्वा किंचिदिव संभ्रान्ताः ।)

राजा—(आत्मगतम) अहो धिक् ! पौरा अस्मदन्वेषिणस्तपोवनमुपसर्पन्ति । भवतु । प्रतिगमिष्यामस्तावत् ।

सख्यौ—'आर्य, अनेनारण्यवृत्तान्तेन पर्याकुलाः स्मः । अनुजानीहि न उटजगमनाय ।

राजा —(ससंभ्रमम् ।) गच्छन्तु भवत्यः । वयमप्याश्रमपीडा यथा न भवति तथा प्रयतिष्यामहे । (सर्व उत्तिष्ठन्ति ।)

सख्यौ—'आर्य, असंभावितातिथिसत्कारं भूयोऽपि प्रेक्षणनिमित्तं लज्जामह आर्य विज्ञापयितुम् ।

राजा—मा मैवम् । दर्शनेनैव भवतीनां पुरस्कृतोऽस्मि ।

(शकुन्तला राजानमवलोकयन्ती सख्याजं विलम्ब्य सह सखीभ्यां निष्क्रान्ता ।)

राजा—मन्दौत्सुक्योऽस्मि नगरगमनं प्रति । यावदनुयात्रिकान्समेत्य नानिदूरे तपोवनस्य निवेशयेयम् । न खलु शक्नोमि शकुन्तलाव्यापारादात्मानं निवर्तयितुम् । मम हि

गच्छति पुरः शरीरं धावति पश्चादसंस्तुतं चेतः ।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥ ३१ ॥ (निष्क्रान्ताः सर्वे)

इति प्रथमोऽङ्कः ।

1. अज्ज इमिणा आरण्णअवुत्तन्तेण पज्जाउल्ला, अणुजाणीहि णो उडजगमणस्स ।
2. अज्ज असंभाविदअदिहिसक्कारं भूओवि पेक्खणणिमित्तं लज्जेमो अज्ज विण्णवेदुं ।

अथ द्वितीयोऽङ्कः

(ततः प्रविशति विषण्णो विदूषकः।)

विदूषकः—(निःश्वस्य।) [1]भो दिट्ठम्! एतस्य मृगयाशीलस्य राज्ञो वयस्यभावेन निर्विण्णोऽस्मि। अयं मृगोऽयं वराहोऽयं शार्दूल इति मध्याह्नेऽपि ग्रीष्मविरलपादपच्छायासु वनराजिष्वाहिण्ड्यते अटवीतोऽटवीम्। पत्रसंकरकषायाणि कटुकानि गिरिनदीजलानि पीयन्ते। अनियतवेलं शूल्यमांसदुर्यिष्ठ आहारो भुज्यते। तुरगानुधावनकण्डुतमंधे रात्रावपि निकामं शयितव्यं नास्ति। ततो महत्येव प्रत्यूषे दाम्याःपुत्रैः शकुनिलुब्धकैर्वनग्रहणकोलाहलेन प्रतिबोधितोऽस्मि। इयतेदानीमपि पीडा न निष्क्रामति। तदो गण्डस्योपरि पिण्डकः संवृत्तः। ह्यः किलास्मास्ववर्हानेषु तपस्वी मृगानुसारेणाश्रमपदं प्रविष्टस्य तापसकन्यका शाकुन्तला समाधन्यतया दर्शिता! सांप्रतं नगरगमनाय मनः कथमपि न करोति! अद्यापि तस्या एवेन्तयतोऽक्ष्णोः प्रभातमासीत्। का गतिः! यावत्तं कृताह्निकपरिक्रमं पश्यामि।

---

1. भो दिट्ठं। एतस्य मिअआमाअरस्स राइणो अ अस्स भावेण णिव्विण्णो म्हि। अअं मओ अअं वराहो। अअ-द्दूलो त्ति मज्झण्हे वि णिअअरण्णच्छाआसु वणराईसु आहिण्डीअदि अडवीदो अडवीं। णिअअरण्णजलाइं कडुआइं णिण्णइजलाइं पीअन्ति। अणिअदवेलं सुद्दमंसबहुलो आहारो भुज्जदि। तुरगाधावणकण्डुइदंगो रत्तिम्मि वि णिअमं ण लब्भदि सइदुं। तदो अहन्ते एव्व पच्चूसे दाम्मिपुत्तेहि सउणिलुद्धएहि वणग्गहणकोलाहलेण पडिबोधिदो म्हि। इत्तिएण दाणिं वि पीडा ण णिक्कमदि। तदो अ अहस्स उवरिं पिण्डओ संवुत्तो। हिअए विअ अम्हासु ओदिण्णेण तत्तहोदा मिआणुसारेण अस्समपदं पविट्ठस्स तावसकण्णआ सउन्तला मए अवलोइदा। संपदं णअरगमणम्हि मणं कहं वि ण वोलेदि। अज्ज वि मे तं एव्व चिन्तअन्तस्स

इति परिक्रम्यावलोक्य च।) एष बाणासनहस्ताभिर्यवनीभिर्वनपुष्पमालाधारिणीभिः परिवृत इत एवागच्छति प्रियवयस्यः। भवतु। अङ्गभङ्गविकल्प इव भूत्वा स्थास्यामि। यद्येवमपि नाम विश्रमं लभेय!

(इति दण्डकाष्ठमवलम्ब्य स्थितः।)

(ततः प्रविशति यथानिर्दिष्टपरिवारो राजा।)

राजा—

कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनाश्वासि।
अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते ॥ १ ॥

(स्मितं कृत्वा।) एवमात्मानिप्रायसंभावितेङ्गितवृत्तिः प्रार्थयित्रा विडम्ब्यते।

स्निग्धं वीक्षितमन्यतोऽपि नयने यत्प्रेरयन्त्या तया
यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव।
मा गा इत्युपरुद्धया यदपि मा मास्यूयमुक्ता सखी
सर्वं तत्किल मत्परायणमहो कामी स्वतां पश्यति ॥२॥

विदूषकः—(तथास्थित एव।)[1] भो वयस्य, न मे हस्तपादं प्रसरति। तद्वाङ्मात्रेण जाप्यसे।

राजा—(सस्मितम्) कुतोऽयं गात्रोपघातः?

विदूषकः—[2]कुतः किल स्वयमस्याकृतीकृत्याश्रुकारणं पृच्छसि?

राजा—न खल्ववगच्छामि!

एसो बाणासणहत्थाहिं जवणीहिं वणपुप्फमालाधारिणीहि परिवुडो इदो एव्व आअच्छदि पिअवअस्सो। होदु। अङ्गभङ्गविअप्पो विअ भविअ चिट्ठिस्सं। अह एव्व वि णाम विस्समं लहेअ।

1. भो वअस्स णं मे हत्थपाआ पसरन्ति। ता वाआमेत्तएण जआवीअसि।
2. कहं किल मए अच्छी आउलीकरिअ अस्सुकारणं पुच्छेसि?

विदूषकः—[1]भो वयस्य, यद्येतसः कुञ्जशीलां विडम्बयति तत्किमात्मनः प्रभावेण, ननु नदीवेगस्य ?

राजा—नदी वेगस्त्रत्र कारणम् ।

विदूषकः—[2]ममापि भवान् ।

राजा—कथमिव ?

विदूषकः—[3]एवं राजकार्याण्युज्झित्वैतादृश आकुलप्रदेशे वनचरवृत्तिना त्वया भवितव्यम् । यन्मत्यं प्रत्यहं श्वापदसमुत्सारणैः संक्षोभितसंचिन्तानां मम गात्राणामधीशोऽस्मि संवृत्तः । तत्प्रसादयिष्यामि विस्रब्धं मामेकाहमपि तावद्विश्रमितुम् ।

राजा—(स्वगतम् ।) अयं चैवमाह ! ममापि काश्यपसुतामनुस्मृत्य मृगयाविच्छेदः ! कुतः,

न नमयितुमधिज्यमस्मि शक्तो धनुरिदमाहितमायकं मृगेषु ।
सहवसतिमुपेत्य यैः प्रियायाः कृत इव मुग्धविलोकितोपदेशः ॥

विदूषकः—(राजानं मुखं विलोक्य ।)[4]अत्रभवान्किमपि हृदये कृत्वा मन्त्रयते । अरण्ये मया सहितमीप्सित !

राजा—(सस्मितम् ।) किमन्यत् । अनतिक्रमणीयं मे सुहृद्वाक्यमिति स्थितोऽस्मि ।

---

1 भो वयस्य यद्येतसः कुञ्जशीलां विडम्बयति तत्किमात्मनः प्रभावेण किं वेदसो वेगेन ।

2 ममापि भवान् । [illegible] आकुलप्रदेशे आकुलप्रदेशे वनचरवृत्तिना [illegible] मुच्चारणैः संक्षोभितसंचिन्तानां [illegible] विस्रब्धं [illegible]

3 [illegible]

विदूषकः—[1]चिरं जीव ! (इति गन्तुमिच्छति ।)

राजा—वयस्य तिष्ठ । सावशेषं मे वचः ।

विदूषकः—[2]आज्ञापयतु भवान् ।

राजा—विश्रान्तेन भवता समाप्येकस्मिन्ननायासे कर्मणि सहा-
न भवितव्यम् ।

विदूषकः—[3]किं मोदकखादिकायाम ? तेन ह्ययं सुगृहीतः क्षणः ।

राजा—यत्र वक्ष्यामि । कः कोऽत्र भोः ?

(प्रविश्य) **दौवारिकः**—(प्रणम्य)[4]आज्ञापयतु भर्ता ।

राजा—रैवतक, सेनापतिस्तावदाह्वयताम् ।

दौवारिकः—[5]तथा । (इति निष्क्रम्य सेनापतिना सह पुनः प्रविश्य,)
एष आज्ञावचनोत्कण्ठो भर्तेतो दत्तदृष्टिरेव तिष्ठति । उपसर्पत्वार्यः ।

सेनापतिः—(राजानमवलोक्य) दृष्टदोषापि स्वामिनि मृगया
स्वं गुणायैव संवृत्ता । तथा हि देवः,

अनवरतधनुर्ज्यास्फालनक्रूरपूर्वै
रविकिरणसहिष्णु स्वेदलेशैरभिन्नम् ।
अपचितमपि गात्रं व्यायतत्वादलक्ष्यं
गिरिचर इव नागः प्राणसारं बिभर्ति ॥ ४ ॥

(उपेत्य) जयतु जयतु स्वामी । गृहीतश्वापदमरण्यम् । किमन्यत्रास्थीयते ?

राजा—मन्दोत्साहः कृतोऽस्मि मृगयापवादिना माधव्येन ।

1. चिर जीअ । 2. आणवेदु भवं । 3. किं मोदअखज्जिआए ?
तेण हि अअं सुगहीदो खणो । 4. आणवेदु भट्टा । 5. तह ।
[illegible] चिट्ठदि । उपसप्पदु आज्जो ।

सेनापतिः—(जनान्तिकम्) सखे, स्थिरप्रतिबन्धो भव। यावत्स्वामिनश्चित्तवृत्तिमनुवर्तिष्ये। (प्रकाशम्) प्रत्यक्षमेव वैधेयः ननु प्रभुरेव निदर्शनम् !

मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः।
उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले
मिथ्यैव व्यसनं वदन्ति मृगयामीदृग्विनोदः कुतः ॥५॥

विदूषकः—[1]अपेहि, रे उत्साहहेतुक। अत्रभवान्प्रकृतिमापन्नः त्वं तावदटवीतोऽटवीमाहिण्डमानो नगरनागरिकालोलुपस्य जीर्णर्क्षस्य कस्यापि मुखे पतिष्यसि।

राजा—भद्र सेनापते, आश्रमसंनिकृष्टे नियुक्तोऽस्मि। अतस्तद्वचो नाभिनन्दामि। अद्य तावत्;

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु।
विश्रब्धं क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले
विश्रामं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः ॥६॥

सेनापतिः—यदभिरुचितं भवतः।

राजा—तेन हि निवर्तय पूर्वगतान्वेषणग्राहिणः। यथा न मे सैनिकास्तपोवनमुपरुन्धन्ति तथा निषेद्धव्याः। पश्य;

शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः।
स्पर्शानुकूला इव सूर्यकान्तास्तदन्यतेजोऽभिभवाद्वमन्ति ॥७॥

---

1. अपेहि रे उत्साहहेतुक। अत्रभवान् प्रकृतिमापन्नः। तुम तावद् अटवीतो

सेनापतिः—यदाज्ञापयति स्वामी ।

विदूषकः—[1]ध्वंपतां त उत्साहवृत्तान्तः ।

(निष्क्रान्तः सेनापतिः ।)

राजा—(परिजनं विलोक्य ।) अपनयन्तु भवत्यो मृगयावेशम् । [2]क, त्वमपि स्वं नियोगमशून्यं कुरु ।

परिजनः—[3]यदेव आज्ञापयति । (इति निष्क्रान्तः ।)

विदूषकः—[4]कृतं भवता निर्मक्षिकम् । सांप्रतमेतस्मिन्पादपच्छाया-चित्रवितानमनाथे शिलातले निषीदतु भवान्यावदहमपि सुखासीनो [5]मि ।

राजा—गच्छाग्रतः ।

विदूषकः—[6]एतु भवान् । (इत्युभौ परिक्रम्योपविष्टौ ।)

राजा—माधव्य, अनवाप्तचक्षुःफलोऽसि । येन त्वया दर्शनीयं न [7]म् ।

विदूषकः—[8]ननु भवानग्रतो मे वर्तते !

राजा—सर्वः कान्तमात्मीयं पश्यति । अहं तु तामेवाश्रम-[9]लामभूतां शकुन्तलामधिकृत्य ब्रवीमि ।

विदूषकः—(स्वगतम्) [10]भवतु । अस्यावसरं न दास्ये । (प्रकाशम्) [11]वयस्य, ते तापसकन्यकाभ्यर्थनीया दृश्यते ।

राजा—सर्वे न परिहार्ये वस्तुनि पौरवाणां मनः प्रवर्तते ।

---

1. धम्मदु दे उच्चाइदवुत्तन्ता । 2. ज देवो आणवेदि ।
3. जदि भवदा णिम्मच्छिअ ! सपद एदस्मिं पादवच्छाआविरइदविदाणसणाथे सिलाअले णिसीददु मम जाव अहं वि सुहासीणो होमि । 4. एदु भवं ।
5. णं भवं अग्गदो मे वट्टदि । 6. होदु से अनसर ण दाइस्सं जो वअस्स ते तावसकण्णआ अब्भत्थणीआ दीसति ।

सुरयुवतिसंभवं किल मुनेरपत्यं तदुज्झिताधिगतम् ।
अर्कस्योपरि शिथिलं च्युतमिव नवमालिकाकुसुमम् ॥८॥

विदूषकः—(विहस्य) [1]यथा कस्यापि पिण्डखर्जूरैरुद्वेजितस्य तिन्तिणकामभिलाषो भवेत्तथा स्त्रीरत्नपरिभाविनो भवत इयमभ्यर्थना।

राजा—न तावदेनां पश्यामि येनैवमवादीः ।

विदूषकः—[2]तत्खलु रमणीयं यद्भवतोऽपि विस्मयमुत्पादयति ।

राजा—वयस्य किं बहुना ।

चित्रे निवेश्य परिकल्पितसत्त्वयोगा
रूपोच्चयेन मनसा विधिना कृता नु ।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः ॥ ९ ॥

विदूषकः—[3]यद्येवं, प्रत्यादेश इदानीं रूपवतीनाम् ।

राजा—इदं च मे मनसि वर्तते ।

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम् ।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥ १० ॥

विदूषकः—[4]तेन हि लघु परित्रायतामेनां भवान् । मा कस्यापि तपस्विन इंगुदीतैलचिक्कणशीर्षस्य हस्ते पतिष्यति ।

---

1. तत् कस्यचित् विषण्डखर्जूरैः उद्वेजितस्य तिन्तिणकायां अभिलाषो भवेत्, तथा स्त्रीरत्नपरिभाविनो भवतः इयमभ्यर्थना । 2. तं खलु रमणीयं यद्भवतोऽपि विस्मयमुत्पादयति । 3. यद्येवं प्रत्यादेशो दीयतां रूपवतीनाम् । 4. तेन हि लघु परित्रायतामेनां भवान् । मा कस्यचित् तपस्विनः इङ्गुदीतैलाभ्यक्तचिक्कणशीर्षस्य हस्ते पतिष्यति ।

राजा —परवती खलु तत्रभवती । न च संनिहितोऽत्र गुरुजनः ।

विदूषकः—[1]अथ भवन्तमन्तरेण कीदृशस्तस्या दृष्टिरागः ?

राजा —निसर्गादेवाप्रगल्भस्तपस्विकन्याजनः । तथापि तु

अभिमुखे मयि संहृतमीक्षणं
हसितमन्यनिमित्तकृतोदयम् ।
विनयवारितवृत्तिरतस्तया
न विवृतो मदनो न च संवृतः ॥ ११ ॥

विदूषकः—[2]न खलु दृष्टमात्रस्य तवाङ्गं समारोहति ।

राजा—मिथः प्रस्थाने पुनः शालीनतयापि काममाविष्कृतो भावस्तत्रभवत्या । तथा हि ।

दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे
तन्वी स्थिता कतिचिदेव पदानि गत्वा ।
आभीद्विवृत्तवदना च विमोचयन्ती
शाखासु वल्कलमसक्तमपि द्रुमाणाम् ॥ १२ ॥

विदूषकः—[3]तेन हि गृहीतपाथेयो भव । कृतं त्वयोपवनं तपोवनमिति पश्यामि ।

राजा—सखे तपस्विभिः कैश्चित्परिज्ञातोऽस्मि । चिन्तय तावत्केनापदेशेन पुनराश्रमपदं गच्छामः ।

विदूषकः—[4]कोऽपरोऽपदेशो युष्माकं राज्ञाम् ? नीवारषष्ठभागमस्माकमुपहरन्त्विति ।

1. अत्त भवन्त अन्तरेण कीदिसो से दिट्ठिरागो ।
2. ण क्खु दिट्ठमेत्तस्स तुह अङ्गं समारोहदि ।
3. तेण हि गहीदपाधेओ होहि । किदं दे उववणं तवोवणं त्ति पेक्खामि ।
4. को अवरो अवदेसो तुम्हाणं । णीवारसट्ठभागं अम्हाणं उवहरन्तु त्ति ।

राजा—मूर्ख अन्यैरपि भागधेयमेते तपस्विनो निर्वर्तयन्ति । रत्नराशीनपि विहायाभिनन्द्यते । पश्य ।

यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षयि तत्फलम् ।
तपःषड्भागमक्षय्यं ददत्यारण्यका हि नः ॥ १३ ॥

(नेपथ्ये) हन्त [illegible] ।

राजा—(कर्णं दत्त्वा) अये दिष्ट्या सन्तप्तजनवैद्यवचनमिवमर्थवितथम् (प्रविश्य) **दौवारिकः**—जयतु जयतु भवान् । एतौ तौ ऋषिकुमारौ प्रतीहारभूमिमधितिष्ठतः ।

राजा—[illegible] ।

दौवारिकः—[illegible] ।

(इति निष्क्रम्य ऋषिकुमाराभ्यां सह प्रविश्य,) इत इतो भवन्तौ ।

(उभौ राजानं विलोकयतः ।)

प्रथमः—अहो मदिरेक्षणेऽपि । निर्वर्णयितुमस्य वपुः । अथवा उपपन्नमेतत्—मन्त्रकृतः । आत्मनिर्वृत्तौ । इतः ।

अध्यात्मज्ञानवानसि मुनिरिव गृहमेधिनोऽप्यस्य योग्ये
रक्षायोगादवाप्तः प्रभवति नियतं क्षत्रियः प्रत्ययं वः ।
अभ्यासादार्यवृत्तिर्विनयमधुरया शान्तया किं पुनर्यः
पुण्यः श्रोत्रेन्द्रियो मुनिरिति बहुशः केवलं राजपूर्वः ॥१४॥

द्वितीयः—सोमरात, अयमेव खल्वस्माकं दुष्यन्तः ।

प्रथमः—अथ किम् ।

द्वितीयः—तेन हि

1. [illegible]
2. [illegible]

नैतच्चित्रं यदयमुदधिश्यामलां धात्रीं-
मेकः कृत्स्नां नगरपरिघप्रांशुबाहुर्भुनक्ति ।
आशंसन्ते समितिषु पुरा यद्बलं हि दैत्यै-
स्तस्याधिज्ये धनुषि विजयं पौरुहूते च वज्रे ॥१५॥

उभौ (उपगम्य, विलोक्य च) अनेन ।

राजा -(आत्मनादुत्थाय) आभिरात्मीयैः सत्कर्मभिः ।

उभौ -अस्मिन्भाग्ये ! (इति कञ्चुकिनमुल्लोकयतः ।)

राजा -(सप्रणामं परिगृह्य) आज्ञामभिलषामि ।

उभौ -विदितो भवानाश्रमवासिभ्यः । तेन भवन्तं प्रार्थयन्ते ।

राजा -किमाज्ञापयन्ति ?

उभौ तत्रभवतः कण्वस्य महर्षेर्निर्विघ्नानि कर्माणि न दुष्टविघ्नमु-
त्पादयन्ति । तत्कतिपयरात्रं मातलिप्रतीक्षेण मया मनाथीक्रियता-
माश्रम इति ।

राजा -अनुगृहीतोऽस्मि ।

विदूषकः -(अवलोक्य) एषोऽनीकानुकूलो नेऽभ्यर्थनां ।

राजा-(स्मितं कृत्वा) वयस्य, मदचनादुच्यतां सारथिः । सज्जीकृतं
धनुरुत्थापयेति ।

दौवारिकः - यदेव आज्ञापयति । (इति निष्क्रान्तः ।)

उभौ -(सहर्षम्)

अनुकारिणि पूर्वेषां युक्तरूपमिदं त्वयि ।
आपन्नाभयसत्त्वेषु दीक्षितः खलु पौरवाः ॥ १६ ॥

राजा—(सप्रणामम्) गच्छतां पुरो भवन्तौ । अहमप्यनुपदम गत एव ।

उभौ—विजयस्व । (इति निष्क्रान्तौ ।)

राजा—माधव्य, अप्यस्ति शकुन्तलादर्शने कुतूहलम् ?

विदूषकः—[1]प्रथमं सपरिवाहमासीत् । इदानीं राक्षसवृत्तान्तैः बिन्दुरपि नावशेषितः ।

राजा—मा भैषीः । ननु मत्समीपे वर्तिष्यसे ।

विदूषकः—[2]एष राक्षसादृश्यितोऽस्मि ।

(प्रविश्य) **दौवारिकः**—[3]सज्जो रथो भर्तुर्विजयप्रस्थानमपेक्षते । एष पुनर्नगरादेवीनामाज्ञाप्रहरः करभक आगतः ।

राजा—(सादरम्) किमम्बाभिः प्रेषितः ?

दौवारिकः—[4]अथ किम् ।

राजा—ननु प्रवेश्यताम् ।

दौवारिकः—[5]तथा । (इति निष्क्रम्य, करभकेण सह प्रविश्य;) एष भर्ता । उपसर्प ।

करभकः—[6]जयतु जयतु भर्ता । देव्याज्ञापयति । आगामिनि चतुर्थदिवसे प्रवृत्तपारणो म उपवासो भविष्यति । तत्र दीर्घायुषावश्यं संनिहितेन भवितव्यमिति ।

राजा—इतस्तपस्विकार्यम् । इतो गुरुजनाज्ञा । यद्यप्यनतिक्रमणीयम् । किमत्र प्रतिविधेयम् ?

1. पढमं सपरिवाहं आसि । ताणि रक्खसवुत्तन्तेण बिन्दुविणावसेसिदो ।

2. एसो रक्खसादो रक्खिदोम्हि । 3. सज्जो रधो भट्टिणो विजअपत्थाणं अवेक्खदि । एसो उण णअरादो देवीणं आणत्तिहरो करभओ आअदो । 4. अध किं । 5. तह । एसो भट्टा । उवसप्प । 6. जेदु भट्टा । देवी आणवेदि । आआमिणि चउत्थदिअहे पउत्तपारणो मे उववासो भविस्सदि । तहि दीहाउणा अवस्सं संणिहिदेण

विदूषकः—[1]त्रिशङ्कुरिवान्तराले तिष्ठ !

राजा—सत्यमाकुलीभूतोऽस्मि ।

कृत्ययोर्भिन्नदेशत्वाद द्वैधीभवति मे मनः ।
पुरः प्रतिहतं शैले स्रोतः स्रोतोवहो यथा ॥ १७ ॥

(विचिन्त्य) सखे त्वमम्बया पुत्र इति प्रतिगृहीतः । यतो भवानितः प्रतिनिवृत्य तपस्विकार्यैकग्रमानसं मामावेद्य तत्रभवतीनां पुत्रकृत्यमनुष्ठातुमर्हति ।

विदूषकः—[2]न खलु मां रक्षोभीरुकं गणयसि ।

राजा—(सस्मितम् ।) कथमेतद्भवति संभाव्यते ?

विदूषकः—[3]यथा राजानुजेन गन्तव्यं तथा गच्छामि ।

राजा—ननु तपोवनोपरोधः परिहरणीय इति सर्वाननुयात्रिकांस्त्वयैव सह प्रस्थापयामि ।

विदूषकः—(स्वगतम् ।) [4]तेन हि युवराजोऽस्मीदानीं संवृत्तः ।

राजा—(स्वगतम् ।) चपलोऽयं बटुः । कदाचिदस्मत्प्रार्थनामन्तःपुरेभ्यः कथयेत् । भवतु । एनमेवं वक्ष्ये । (विदूषकं हस्ते गृहीत्वा । प्रकाशम् ।) वयस्य, ऋषिगौरवादाश्रमं गच्छामि । न खलु सत्यमेव तापसकन्यकायां ममाभिलाषः । पश्य ।

क्व वयं क्व परोक्षमन्मथो मृगशावैः सममेधितो जनः ।
परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः ॥१८॥

विदूषकः—[5]अथ किम् ।

(इति निष्क्रान्ताः सर्वे)

इति द्वितीयोऽङ्कः

1. तिसङ्कु विअ अन्तराले चिट्ठ ! 2. ण क्खु मं रक्खोभीरुअं गणेसि ! 3. [illegible]

तृतीयोऽङ्कः

(ततः प्रविशति कृशानाम्नो यजमानशिष्यः ।)

शिष्यः—अहो महानुभावः पार्थिवो दुष्यन्तः । यत्प्रतिष्ठा एवाश्रमं तत्रभवति निरुपद्रवाणि नः क्रतुकर्माणि संवृत्तानि ।

का कथा बाणसंधाने ज्याशब्देनैव दूरतः ।
हुंकारेणेव धनुषः स हि विघ्नानपोहति ॥ १ ॥

यावदिमान्वह्निसंस्तरणार्थमोषधीः समित्कुशमपि । (परिक्रम्यावलोक्य च । आकाशे ।) प्रियंवदे, कस्येदमनुपदमनुष्ठेयं गृहीतानि च नलिनीपत्राणि नीयन्ते ? (पुरोऽवलोक्य ।) हिं अपीदं ? आतपदुःखनाहृतवदम्बया शकुन्तलया ! कण्वः पुत्रीस्नेहादेवेति ? तर्हि यत्नादुपचर्यताम् । या खलु भगवतः कण्वस्य कुलपतेरकृत्रिमेऽपि मयि तावद्वैतानिकं शान्तियुदकमर्घ्यं गौतमीहस्ते प्रेषयिष्यामि ।

इति निष्क्रान्तः ।

द्वितीयोऽङ्कः ।

(ततः प्रविशति कामयमानाभ्यर्थयमानाभ्यां राजा ।)

राजा—(सचिन्तं निर्वर्ण्य ।)

जाने तपसो वीर्यं मा बाल्या परवतीति मे विदितम् ।
अलमस्मिन्तपो हृदयं तथापि नयं निवर्तयितुम् ॥ २ ॥

(मदनबाधां निरूप्य ।) भगवन्हुताशन, रक्षा सर्वत्र सम्भाव्यमानमर्हसि कामिजनवाञ्छितार्थः । तत्

तव कुसुमशरत्वं शीतरश्मित्वमिन्दो-
र्द्वयमिदमयथार्थं दृश्यते मादृशेषु ।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखै-
स्त्वमपि कुसुमबाणान्वज्रसारीकरोषि ॥ ३ ॥

अनिशमपि मकरकेतुर्मनसो रुजमावहन्नभिमतो मे ।
यदि मदिरेक्षणनयनां नामधिकृत्य प्रहरतीति ॥ ४ ॥

खेदं, परिक्रम्य) कं नु खलु संलक्ष्यते कर्मणि मत्स्यैरनुज्ञातः श्रमक्लान्तमात्मानं विनोदयामि । (निश्चस्य) किं नु खलु मे प्रियादर्शनाहते ...णमन्यत् ? तदेनामेव चिन्तयामि । (सूर्यमवलोक्य) उमामुद्वातपवेलां ...येण खलावल्यवन्यु मालिनीतीरेषु मत्सखीजनेन शकुन्तला ...यति । तत्रैव गच्छामि । (परिक्रम्य, सम्भ्रमं रूपयित्वा,) अहो, ...वातसुभगोऽयमुद्देशः !

शक्यमभिन्दमुरभिः क्षणबाही मालिनीतरङ्गाणाम् ।
अङ्गैरङ्गतसंगविरतमालिङ्गितुं पवनः ॥ ५ ॥

(परिक्रम्यावलोक्य च) अस्मिन्नेवमालिनीतीरे लतामण्डपे संनिहितया शकुन्तलया भवितव्यम् । तथा हि ।

अभ्युन्नता पुरस्ताद्दृढा जघनगौरवात्पश्चात् ।
दारुण्यस्य पाण्डुपत्रैः सदर्भकुशैरभिनता ॥ ६ ॥

...वर्हिदारणाय परिक्रमामि । (परिक्रम्य तथा कृत्वा सहर्षम्) अये, ...ये देवानर्णयम् ! अथा मे मनोरथप्रियतमा सकुसुमास्तरणं शिलापट्टमधिशयाना मयोपभोगयोग्यं भवतु । श्रोष्याम्यासां विश्रम्भकथामहम् । (इति निष्क्रान्तः ।)

(ततः प्रविशति यथोक्तव्यापारा सह सर्वाभ्यां शकुन्तला ।)

सख्यौ—(उपव्रज्य, सस्नेहम् ।) हला शकुन्तले, अपि सुखाय ते नलिनीपत्रवातः ?

शकुन्तला— किं मां वीजयतः सख्यौ ?

1. ...ल्या मन्दमन्दं अपि सुखाय ते नलिनीपत्रवातः । 2. किं मां वीजयन्तौ सख्यौ ?

(सख्यौ विषादं नाटयित्वा परस्परमवलोकयतः।)

राजा—बलवदस्वस्थशरीरा खलु शकुन्तला दृश्यते। (सवितर्कम्) तत्किमयमातपदोषः स्यादुत यथा मे मनसि वर्तते। (साभिलाषं निर्वर्ण्य) अथ वा कृतं संदेहेन।

स्तनन्यस्तोशीरं प्रशिथिलमृणालैकवलयं
प्रियायाः सावाधं किमपि कमनीयं वपुरिदम्।
समस्तापः कामं मनसिजनिदाघप्रसरयो-
र्न तु ग्रीष्मस्यैवं सुभगमपराद्धं युवतिषु ॥ ७ ॥

प्रियंवदा—(जनान्तिकम्)[1] अनसूये, तस्य राजर्षेः प्रथमदर्शनादारभ्य पर्युत्सुकेव शकुन्तला। किं नु खल्वस्यास्तन्निमित्तोऽयमातङ्को भवेत्?

अनसूया—[2]सखि ममापीदृश्याशङ्का हृदयस्य। भवतु। प्रेक्ष्यामि तावदेनाम्। (प्रकाशम्) सखि, प्रष्टव्यासि किमपि। बलवान्खलु ते संतापः!

शकुन्तला—(पूर्वार्धेन शयनादुत्थाय,) [3]हला किं वक्तुकामासि?

अनसूया—[4]हला शकुन्तले, अनभ्यन्तरे खल्वावां मदनगतस्य वृत्तान्तस्य। किं तु यादृशीतिहासनिबन्धेषु कामयमानानामवस्था श्रूयते, तादृशी तव पश्यामि। कथय, किंनिमित्तं ते संतापः? विकारं खलु परमार्थतोऽज्ञात्वानारम्भः प्रतीकारस्य!

---

1. अणसए तस्स राएसिणो पढमदंसणादो आरब्भ पज्जुस्सुआ विअ सउन्दला। किं णु क्खु मे तण्णिमित्तो अअं आतङ्को भवे।

2. सहि, ममावि ईदिसी आसङ्का हिअअस्स। होदु। पुच्छिस्सं दाव ण। सहि, पुच्छिदव्वामि किंपि। बलवं क्खु दे सन्तावो! 3. हला, किं वत्तुकामासि?

4. हला सउन्दले, अणब्भन्तरा क्खु अम्हे मदणगदस्स वुत्तन्तस्स। किंदु जादिसी इदिहासणिबन्धेसु कामअमाणाणं अवत्था सुणीअदि तादिसिं दे पेक्खामि। कहेहि किंणिमित्तं दे संदावो? विआरं क्खु परमत्थदो अजाणिअ अणारम्भो पडिआरस्स।

राजा—अनसूयामप्यनुगतो मदीयस्तर्कः ।

शकुन्तला—(आत्मगतम् ।) [1]ब्रह्मण्यखलु मेऽभिनिवेशः ! इदानीमपि सहसैनयोर्न शक्नोमि निवेदयितुम् ।

प्रियंवदा—[2]सखि शकुन्तले, सुष्ठुएपा भणति । किमात्मन आतङ्कमुपेक्षसे ? अनुदिवसं खलु परिहीयसेऽङ्गैः ! केवलं लावण्यमयी छाया त्वां न मुञ्चति !

राजा—अवितथमाह प्रियंवदा ! यतो हि ;

क्षामक्षामकपोलमाननमुरः कांक्षेव दूयस्तनं
मध्यः क्लान्तनतः प्रकामशिथिलौ बाहू सखिन्नौ पाण्डुरा ।
शोच्या च प्रियदर्शना च मदनाद्वस्थाऽस्य सोढा त्वया
पत्राणामिव शोषणेन मरुता स्पृष्टा लता माधवी ॥८॥

शकुन्तला—[3]सखि, हृदयनिवासिनि मयि किं नाम चिन्तयिष्यति । गमिष्यामि वा इदानीं वा भविष्यामि ।

उभे—[4]अत एव खलु विक्लवोऽयं जनः । प्रियसखीजनविनोदेऽपि कुतः सह्यवेदनं भवति !

राजा— पृष्टा जनेन समदुःखसुखेन बाला
नेयं न वक्ष्यति मनोगतमाधिहेतुम् ।
दृष्टो विवृत्य बहुशोऽप्यनया सतृष्ण-
मन्त्रान्तरे श्रवणकातरतां गतोऽस्मि ॥ ९ ॥

1. बलवं खलु मे अहिणवेसो । किणो विअप्पो एदाए । [illegible]
2. सहि सउन्तले, सुट्ठु एसा भणादि । किं अत्तणो आदङ्कं [illegible] सि ! अणुदिअहं खलु परिहीअसि अङ्गेहिं ! केवलं लावण्णमअी छाआ [illegible] ।
3. सहि, कहं वा अणग्घम्मि बहुमाणे ? किन्तु [illegible] वा अहिरमिस्सं ।
4. [illegible] ।

शकुन्तला—[1]भवति, यतः प्रभृति मम दर्शनपथमागतः स तपोवन-
रक्षिता राजर्षिः - - - (इत्यर्धोक्ते लज्जां नाटयति ।)

उभे—[2]कथयतु प्रियंवदा ।

शकुन्तला—[3]तत आरभ्य स्मरतेनाभिलाषेणैवंव्यवस्थासु संवृत्ता ।

राजा—(सहर्षम् ।) श्रुतं श्रोतव्यम् !

स्मर एव तापहेतुर्निर्दयपरितप्त स एव मे जातः ।
दिवस इवाभ्रश्यामस्तात्पर्यं जीवलोकस्य ॥ १० ॥

शकुन्तला—[4]तदो अणुकम्पणीआ भवामि । अधवा दंसणीअं पढमं पत्थेंती यथा तस्य राजर्षे-
रनुकम्पनीया भवामि । अनया आशया हृदयं मे निर्वर्तते ।

राजा—संशयक्षेत्रे पतितं मनः ।

प्रियंवदा—(अपवार्य ।) [5]सखि, दुरवगाढमनयोरेवंकालहरणस्य । यन्मिमन्वहमानौ, मदनोऽमुभ्यां दोग्धुमारब्धः । अद्युक्तमन्यां अभिलाषोऽभिनन्दितुम् ।

अनसूया—[6]तथा वि एदं मन्तणीअं ।

प्रियंवदा—(प्रकाशम् ।) [7]सखि, किमत्रभवन्तमभिनिवेशः ! सागरमुज्झता त्वया सह महानयमर्थी ! कथमेतां महाराजमनवेक्षणा-
निमक्नलां पल्लविनीं महतें !

---

1. भवति, यतः प्रभृति मम दर्शनपथमागतः स तपोवन-
2. कथयतु प्रियंवदा । 3. तत आरभ्य स्मरतेनाभिलाषेणैवंव्यवस्थासु संवृत्ता ।
4. तदो अणुकम्पणीआ भवामि । अधवा दंसणीअं पढमं पत्थेंती यथा तस्य राजर्षे-
हृदयम् । अथवा दर्शनीयं प्रथमं प्रार्थयन्ती यथा तस्य राजर्षेरनुकम्पनीया भवामि । तथा मे हृदयं अभिलाषो
अभिनन्दति । (अथवा दर्शनीयं प्रथमं प्रार्थयन्ती यथा अनुकम्पनीया भवामि । तथा मे अभिलाषो
सागरं संत्यजता त्वया सह महानयमर्थी । कथमेतां अभिनवपल्लवां

राजा—किमत्र चित्रं, यदि विशाखे शशाङ्कलेखामनुवर्तेते !

अनसूया—[1]कः पुनरसावो भवत्याभ्यामविज्ञम्भितं निभृतं च सख्या मनोरथं संपादयतः ?

प्रियंवदा—[2]निभृतमिति चिन्तनीयं भवेत् । शीघ्रमिति सुकरम् ।

अनसूया—[3]कथमिव ?

प्रियंवदा—[4]ननु स राजर्षिरस्यां निरवद्यत्वा सूचितामिलाष एतावित्वया-प्रजागरकृशो लक्ष्यते !

राजा—सत्यमित्थंभूत एवास्मि । तथा हि ;

इदमशिशिरैरन्तस्तापाद्विवर्णमणीकृतं
निशि निशि भुजस्तम्भापाङ्गप्रसारिभिरश्रुभिः ।
अनतिपुलिनप्रायाताः[5] मृदुर्मणिबन्धना-
त्कनकवलयं स्रस्तं स्रस्तं मया प्रतिसार्यते ॥११॥

प्रियंवदा—(विचिन्त्य) हला, मदुत्तरीयोऽत्र क्रियताम् । तं सुमनोगोपिनं कृत्वा देवसमक्षमस्यै तस्य हस्तं प्रापयिष्यामि ।

अनसूया—रोचते मे सुकुमारः प्रयोगः । किं वा शकुन्तला भणति ?

शकुन्तला—[6]किं नियोगो वा विकल्प्यते ?

1. को उण उवाओ मए एत्थ णिउणं णिहुअं मअणो[7]हं संपाडेमि ।
2. णिउणं ति णिव्वत्तिअ जोग्गं णिम्माइदं सुअं । 3. कधं विअ ?
4. अ एसो राएसी अणण्णा णिरवज्जत्तणेण सूइदाहिलासो एत्तिएण पजागरेण किसो लक्खीअदि ।
5. हला सअणिज्जादो एगपासपरिवत्तणेण मए दिट्ठो अद्धसेज्जाए एसो । 6. किं णिओओ वो विकप्पीअदि ?
7 किं णिओओ वो विकप्पीअदि ?

प्रियंवदा — 'तेन हि अनसूये उपनामपूर्वं चिन्तय तावत्किम लिखितवन्धेनम् ।

शकुन्तला — हला, चिन्तयाम्यहम् । अवधीरणाभीरुकं पुनर्वं म हृदयम् ।

राजा—(सहर्षम्)

अयं स ते तिष्ठति संगमोत्सुको
विशङ्कसे भीरु यतोऽवधीरणाम् ।
लभेत वा प्रार्थयिता न वा श्रियं
श्रिया दुरापः कथमीप्सितो भवेत् ॥ १२ ॥

सखी— यदि आत्मगुणापेक्षिनि, कदाचिन्नं शरीरनिर्वापिणि शारदीं ज्योत्स्नां पट्टान्तेन वारयति

शकुन्तला — (सस्मितम्) 'नियोजितेदानीमस्मि ।

(इत्युपविष्टा चिन्तयति ।)

राजा — स्थाने खलु विस्रब्धनिपेण चक्षुषा प्रियामवलोकयामि

उन्नामितैकभ्रुलतामाननमस्याः पदानि रचयन्त्याः ।
कण्टकितेन प्रथयति मय्यनुरागं कपोलेन ॥ १३ ॥

शकुन्तला — हला, चिन्तितं मया यौवनम् । अयंनिहितं पुनर्लेखनसाधनानि ।

1. [illegible] । [illegible] इव हि प्रियंवदा ।

2. हला [illegible] । [illegible] ।

3. अयि [illegible] । [illegible] शारदीं ज्योत्स्नां पट्टान्तेन वारयति ।

4. [illegible] ।

5. हला चिन्तितं मया यौवनम् । अवधीरणाभीरुकं पुनर्लेखनसाधनानि ।

प्रियंवदा—[illegible]

शकुन्तला—[illegible]

उभे—[illegible]

शकुन्तला—(वाचयति ।)

'तव न जाने हृदयं मम पुनः कामे[illegible]रि गात्रिमपि ।
निर्घृण तपति बलीयस्त्वयि वृत्तमनोरथानि [illegible] ॥१४॥

राजा—(सस्पृहमवलोकयन् ।)

तपति तनुगात्रि मदनस्त्वामनिशं [illegible] ।
ग्लपयति यथा शशाङ्कं न तथा [illegible] ॥१५॥

सख्यौ—विलोक्य सहर्षम् । [illegible]

(अनुरागं [illegible]

राजा—अकृतमपि [illegible]

मंदपुटकुसुमशयनान्यासुरुह [illegible]
गुरुपरितापानि न ते [illegible] ॥१६॥

अनसूया—[illegible]

(राजोपविशति । शकुन्तला [illegible]

प्रियंवदा—[illegible] सखीस्नेहः

नमौ पुनरुक्तादिदोषं करोति ।

1. [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

7. दूवेणं पि वो [illegible] म पुणरुत्त-
दोसं करेदि ।

राजा—भद्रे, नैतत्परिहार्यम्[1]। विलक्षितं त्वनुक्रमनुतापं जनय।

प्रियंवदा—'आपृच्छ्य पितरं तपोवनसिनो जनस्यार्तिहरेण भवितव्यमित्येष युष्माकं धर्मः।

राजा—नास्मात्परम्।

प्रियंवदा—'तेन हीयमावयोः प्रियसखी त्वामुद्दिश्येदमभ्यर्थ्या भगवता मदनेनागोपिता। तदर्हस्यस्यामनुकम्पया नीवितमस्या अवलम्बितुं

राजा—भद्रे, साधारणोऽयं प्रणयः। सर्वथानुगृहीतोऽस्मि।

शकुन्तला—(प्रियंवदामवलोक्य।) 'हला, किमन्तःपुरविरहपरिसुकस्य राजर्षेरभिधेन?

राजा—सुन्दरि,

इदमनन्यपरायणमन्यथा हृदयमाह्वयते हृदयं मम।
यदि ममर्थयसे मदिरेक्षणे मदनबाणहतोऽस्मि हतः पुनः॥१७

अनसूया—'वयस्य, बहुवल्लभा राजानः श्रूयन्ते। यथा नो प्रियसखी बन्धुजनशोचनीया न भवति तथा विधेयम्।

राजा—भद्रे, किं बहुना!

परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य मे।
समुद्रगमना चोर्वी सखी च युवयोरियम्॥ १८॥

उभे—निर्वृते स्वः।

---

1. वयस्य, बहुवल्लभा राजानः श्रूयन्ते। यथा नो प्रियसखी बन्धुजनशोचनीया न भवति तथा विधेयम्। 5. निर्वृते स्वः।

प्रियंवदा—(सदृष्टिक्षेपम्) [1]अनसूये, एष इतोदत्तदृष्टिरुत्सुको तिको मातरमनिध्यति । एहि । संयोजयाव एनम् । (इत्युभे प्रस्थिते)

शकुन्तला— हला, दक्षिणाक्षि । अन्यतरा युवयोरागच्छतु ।

भौ—[1]पृथिव्या च. सागरांत सर्व समीपे वर्तते । (इति निष्क्रान्ते ।)

शकुन्तला—[1]कथं गत एव ?

राजा—अलमावेगन । नन्वयमारभ्यविना जनस्तव समीपे वर्तते !

किं शीतलैः क्लमविनोदिभिरार्द्रवाता-
न्सचारयामि नलिनीदलतालवृन्तः ।
अङ्के निधाय करभोरु यथासुखं ते
संवाहयामि चरणावुत पद्मताम्रौ ॥ १९ ॥

शकुन्तला—न खलु मानिन्यात्मानमवमानयितव्ये ।

(इत्युत्थाय गन्तुमिच्छति ।)

राजा—सुन्दरि, अपरिनिर्वाणो जिवनः ; इयं न ते शयनावस्था ।

उत्सृज्य कुसुमशयनं नलिनीदलकल्पितस्तनावरणम् ।
कथमातपे गमिष्यसि परिवाधापेलवैरङ्गैः ॥ २० ॥

(इति बलान्नां निवर्तयति ।)

शकुन्तला—[1]पौरव, न । किंचित् । सहन एवापि न खल्वात्मनः

वामि ।

राजा—भीरु, अलं गुरुजनभयेन । दृष्ट्वा ते विदितधर्मा
भवान्नात्र दोषं ग्रहीष्यति कुलपतिः । पश्य ।

1. अणसूए एसो इदो दण्णदिट्ठी, [illegible] णि पेक्खं तो माद अणेदि । हि ।
[illegible]मणं । 2 हला, अहिणवा हं । अण्णदरा हो आ च्छदु । 3. पुहवाए जो सरणं
[illegible]मणीवदुदु । 4. ण [illegible]णो [illegible] । 5. णो माणीसु अत्ताणं [illegible]राहइस्सं ।
[illegible] [illegible] [illegible] [

गान्धर्वेण [illegible] बह्व्यो राजर्षिकन्यकाः ।
[illegible] पितृभिश्चाभिनन्दिताः ॥२१॥

शकुन्तला — [illegible] मयोऽपि सर्वजनमनुमानयिष्ये

राजा— [illegible]

शकुन्तला— [illegible]

राजा—

अपरिक्षतकोमलस्य [illegible] कुसुमस्येव नवस्य षट्पदेन ।
अधरः किसलयरागकोमलः [illegible] मुग्धे मुग्धेन गृह्यते रभोऽस्य ॥२२

(इति मुखं [illegible] शकुन्तला परिहरति नाट्येन ।

(नेपथ्ये) [illegible] चरम् । उपस्थिता रजनी

शकुन्तला— [illegible] और, असंशयं मम शरी

वृत्तान्तोऽस्य [illegible] एवा [illegible] । तिष्ठत्वान्तरितो भव

राजा— [illegible] मानमादाय तिष्ठति ।)

[illegible] गौतमी सख्यौ च ।)

सख्यौ — [illegible]

गौतमी— [illegible] अपि कुसुंभरागानि तेऽङ्गानि

शकुन्तला — [illegible] विशेषः ।

गौतमी— [illegible] निगच्छाम्येव ते शरीरं भविष्यति ॥

(अभ्युद्धृत्य) [illegible] । [illegible] उटजमेव गच्छामः । (प्रस्थिताः

1. [illegible] 2. [illegible] 3. [illegible]
अनसूया [illegible] मम शरीरपुत्रकोऽयमस्याः
अजा गौतमी [illegible] 5. हला हला [illegible]
गौतमी [illegible] 7. अज्जे अत्थि मे विसेसा
8. हलिणा [illegible] [illegible] । वच्छे परिणा

शकुन्तला—(आत्मगतम् ।)[1] हृदय, प्रथममेव सुखोपनते मनोरथे तिरभावं न मुञ्चसि । सानुशयविघटितस्य कथं ते सांप्रतं संतापः । पदान्तरे स्थित्वा, प्रकाशम् ।) लतावलय, संतापहारक, आमन्त्रये त्वा योऽपि परिभोगाय । (इति दुःखेन निष्क्रान्ता शकुन्तला सहेतराभिः ।)

राजा—(पूर्वस्थानमुपेत्य, सनिःश्वासम् ।) अहो, विघ्नबन्धुः प्रार्थितार्थसिद्धयः ! मया हि;

मुहुर्लिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम् ।
स्वमंसविवर्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तु ॥२३॥

क्व नु खलु संप्रति गच्छामि ? अथ वा, इहैव प्रियापरिभुक्तलतावलये मुहूर्तं स्थास्यामि । (सर्वतोऽवलोक्य,)

तस्याः पुष्पमयी शरीरलुलिता शय्या शिलायामियं
क्लान्तो मन्मथलेख एष नलिनीपत्रे नखैरर्पितः ।
हस्ताभ्रष्टमिदं बिसाभरणमित्यासज्यमानेक्षणो
निर्गन्तुं सहसा न वेतसगृहाच्छक्नोमि शून्यादपि ॥२४॥

(आकाशे ।) राजन्—

सायंतने सवनकर्मणि संप्रवृत्ते
वेदिं हुताशनवतीं परितः प्रयस्ताः ।
छायाश्चरन्ति बहुधा भयमादधानाः
संध्यापयोदकपिशाः पिशिताशनानाम् ॥२५॥

राजा—अयमहमागच्छामि । (इति निष्क्रान्तः ।)

तृतीयोऽङ्कः ।

1 विअस पढम दिअहं सहावणेअ मणोरहे कीरइ [illegible] ।

चतुर्थोऽङ्कः

(ततः प्रविशतः कुसुमावचयं नाट्यन्त्यौ सख्यौ ।)

अनसूया—'प्रियंवदे, यद्यपि गान्धर्वेण विधिना निर्वृत्तकल्याणा शकुन्तलाऽनुरूपभर्तृगामिनी संवृत्तेति निर्वृतं मे हृदयं, तथाप्येतामा[1]श्चिन्तनीयम् ।

प्रियंवदा—'अनसूये ! किमिव ?

अनसूया—'यथायं राजर्षिर्दुष्यन्तो मृगयाविहारिणा सैन्येन नगरं प्रतिष्ठमानः पुरप्रवेशाभिमुखं रथं स्थापयित्वा मां च वैखानसं प्रति विनयावनतां शकुन्तलां दृष्ट्वा न जाने किं वक्ष्यति ।

प्रियंवदा—'विज्ञस्य खलु । न खलु तथाकृतिरनादरणीयां गुणविशेषेषु मनः करोति । तत्किमिदानीं तपोधनं पृष्ट्वा न जानीषे किं प्रतिपत्तव्यमिति ।

अनसूया—'यथाहं पश्यामि तथा तस्य गुरुं भवेः ।

प्रियंवदा—'कथमिव ?

अनसूया—'गुणवते कन्यका प्रतिपादनार्थेऽस्य बान्धवजनः[2] । तं यदि दैवमेव संपादयति नास्त्यनयोर्न कृतं पुण्यैः ।

प्रियंवदा—(पुष्पभाजनं विलोक्य) 'सखि, अवचितानि बहूनि[3] पर्याप्तानि कुसुमानि ।

1. [illegible] 2. [illegible] 3. [illegible]

अनसूया—[1]ननु सख्याः शाकुन्तलायाः सौभाग्यदेवतार्चनीया !

प्रियंवदा—[2]युज्यते । (इति तदेव कर्माभिनयतः ।)

नेपथ्ये) अयमहं भोः ।

अनसूया—(कर्णं दत्त्वा) [3]सखि, अतिथीनामिव निवेदितम् ।

प्रियंवदा—[4]ननूटजमभिगता शाकुन्तला ?

अनसूया—[5]अद्य पुनर्हृदयेन सन्निहिता ! अतएवावद्भिः कुसुमैः ।

(इति प्रस्थिते ।)

नेपथ्ये) आः अतिथिपरिभाविनि,

विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम् ।
स्मरिष्यति त्वां न स बोधितोऽपि स-
न्कथां प्रमत्तः प्रथमं कृतामिव ॥ १ ॥

प्रियंवदा—[6]हा धिक् ! हा धिक् ! अप्रियमेव संवृत्तम् । कस्मिन्नपि पुनर्हेऽवमन्ता शून्यहृदया शाकुन्तला । (पुरोऽवलोक्य,) न खलु गतस्तस्मिन्नपि । तत दुर्वासाः सुलभकोपो महर्षिः । तथा शप्त्वा वेगबन्धोत्फुल्लया दुर्वासया गत्या प्रतिनिवृत्तः !

अनसूया—[7]कोऽन्यो हृदयलाघवं प्रभवति ! गच्छ । पादयोः प्रणम्य निवेदनं ; यावदहमर्घोदकमुपकल्पयामि ।

1. ननु सख्याः शाकुन्तलायाः सौभाग्यदेवतार्चनीया । 2. युज्यते । 3. सखि, अतिथीनामिव निवेदितम् । 4. अनुज्झितनिहिता शाकुन्तला ? 5. अद्य पुनर्हृदयेन सन्निहिता । अतएवावद्भिः कुसुमैः । 6. हा धिक् हा धिक् अप्रियमेव संवृत्तम् । कस्मिन्नपि पुनर्हेऽवमन्ता शून्यहृदया शाकुन्तला । न खलु गतस्तस्मिन्नपि । तत दुर्वासाः सुलभकोपो महर्षिः । तथा शप्त्वा वेगबन्धोत्फुल्लया दुर्वासया गत्या प्रतिनिवृत्तः । 7. कोऽन्यो हृदयलाघवं प्रभवति । गच्छ । पादयोः

प्रियंवदा—[1]तथा । (इति निष्क्रान्ता ।

अनसूया–(पदान्तरे स्खलितं निरूप्य) [2]अहो, आवेगात्स्खलितया गत्या प्रभ्रष्टं ममाग्रहस्तात्पुष्पभाजनम् ! (इति पुष्पोच्चयं रूपयति ।)

(प्रविश्य) **प्रियंवदा**—[3]सखि, प्रकृतिवक्रः स कस्यानुनयं प्रतिगृह्णाति ? किमपि पुनः सानुक्रोशः कृतः ।

अनसूया—(सस्मितम् ।) [4]तस्मिन्बह्वेतदपि । कथय ।

प्रियंवदा—[5]यदा निवर्तितुं नेच्छति, तदा विज्ञापितो मया भगवन् प्रथम इति प्रेक्ष्याविज्ञाततपःप्रभावस्य दुहितृजनस्य भगवतैकोऽपराधो मर्षयितव्य इति ।

अनसूया—[6]तदनन्तरम् ?

प्रियंवदा–[7]ततो "न मे वचनमन्यथा भवितुमर्हति । किं त्वभिज्ञानाभरणदर्शनेन शापो निवर्तयितव्य" इति मन्त्रयमाण एवान्तर्हितः ।

अनसूया—[8]इयमिदानीमाश्वसिमि । अस्ति तेन राजर्षिणा संप्रस्थितेन स्वनामधेयाङ्कितमङ्गुलीयकं यत्तदीयमिति स्वयं पिनद्धम् । तस्मिन्न्यासीकृतया शाकुन्तला भविष्यति ।

प्रियंवदा–[9]सखि, एहि । देवकार्यतावदस्या निर्वर्तयावः । (परिक्रामतः)

---

1. तह । 2. अम्मो । आवेअक्खलिदाए गदीए पब्भट्ठं मे अग्गहत्थादो पुप्फभाअणं । 3 सखि, पकिदिवङ्को सो कस्स अणुणअं पडिग्गेण्हदि । किं वि उण माणकोवो किदो । 4. तम्मि बहुं दंसिअ । कहेहि । 5 जदा णिवत्तिदुं ण इच्छदि तदा विण्णविदो मए । भअवं पढमं ति पेक्खिअ अविण्णादतवप्पहावस्स दुहिदुजणस्स भअवदा एक्को अवराहो मरिसिदव्वो त्ति । 6. तदो तदो । 7. तदो ण मे वअणं अण्णहाभविदु अरिहदि । तह अभिण्णाणदंसणेण सावो णिवत्तिस्सदि त्ति मन्तिअन्तो एव्व अन्तरिदो । 8. सम्म दाणिं अस्सासिमो । अत्थि तेण राएसिणा संपत्थिदेण सणामधेअंकिदं अङ्गुलीअअं सुमरणीअं त्ति मुअं पिणद्धं । तस्सि माहाणीवासा सउन्तलीए भविस्सदि । [illegible]

प्रियंवदा—(विलोक्य) [1]अनसूये, पश्य तावत्। वामहस्तोपहित-
ाऽऽलिखितेव प्रियसखी । भर्तृगतया चिन्तयात्मानमपि नैषा
ावयति । किं पुनरागन्तुकम् !

अनसूया—[2]प्रियंवदे, द्वयोरेव नौ मुख एष वृत्तान्तस्तिष्ठतु ।
क्षितव्या खलु प्रकृतिपेलवा प्रियसखी !

प्रियंवदा—[3]को नामोष्णोदकेन नवमालिकां सिञ्चति ? (निष्क्रान्ते)

विष्कम्भः

(ततः प्रविशति सुप्तोत्थितः शिष्यः ।)

शिष्यः—वेलोपलक्षणार्थमादिष्टोऽस्मि तत्रभवता प्रवासादुपावृत्तेन
ाश्यपेन । प्रकाशं निर्गतस्तावदवलोकयामि कियदवशिष्टं रजन्या इति ।
(परिक्रम्यावलोक्य च ।) हन्त प्रभातम् ! तथा हि ;

यात्येकतोऽस्तशिखरं पतिरोषधामा-
विष्कृतारुणपुरःसर एकतोऽर्कः
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवात्मदशान्तरेषु ॥ २ ॥

अपि च ।

अन्तर्हिते शशिनि सैव कुमुद्वती मे
दृष्टिं न नन्दयति संस्मरणीयशोभा ।
इष्टप्रवासजनितान्यबलाजनस्य
दुःखानि नूनमतिमात्रसुदुःसहानि ॥ ३ ॥

1. अणसूए, पेक्ख दाव । वामहत्थोवहिदवअणा आलिहिदा विअ पिअसही।
णत्थुगदाए चिन्ताए अत्ताणं पि ण एसा विगणेदि । किं उण आअन्तुअं । 2. पिअवदे,
दुवेण एव्व णो मुहे एसो वुत्तन्तो चिट्ठदु । रक्खिदव्वा क्खु पकिदिपेलवा पिअसही ।

(प्रविश्यापटीक्षेपेण।)

अनसूया—[1]यद्यपि नाम विषयपराङ्मुखस्य जनस्यैतन्न विदि तथापि तेन राज्ञा शकुन्तलायामनार्यमाचरितम्।

शिष्यः—यावदुपस्थितां होमवेलां गुरवे निवेदयामि। (निष्क्रान्त·

अनसूया—[2]प्रतिबुद्धापि किं करिष्यामि? न म उचितेष्वा निजकरणीयेषु हस्तपादं प्रसरति! काम इदानीं सकामो भवतु, येना सत्यसंधे जने शुद्धहृदया सखी पदं कारिता। अथवा, दुर्वासःशाप ए विकारयति। अन्यथा, कथं स राजर्षिस्तादृशीनि मन्त्रयित्वैवाव कालस्य लेखमात्रमपि न विसृजति? तदियोऽभिज्ञानमङ्गुलीयकं तस्य विसृजावः। दुःखशीले तपस्विजने कोऽभ्यर्थनाया? ननु सखीगार्म दोष इति व्यवसितापि न पार्श्वानि प्रसरप्रतिनिवृत्तस्य तावदाश्वपत्य दुष्यन्तपरिणीतामात्मवत्त्वां शकुन्तलां निवेदयितुम्। इत्थंगतेऽस्माभि किं करणीयम्?

(प्रविश्य) **प्रियंवदा**— (सहर्षम्) सखि, त्वरस्व त्वरस्व शकुन्तलायाः प्रस्थानकौतुकं निर्वर्तयितुम्।

1. जइ वि ताव विसअपरम्मुहस्स अणस्स एदं ण पाविदं तह वि तेण रण्णा सउन्दलाए अणज्जं आअरिदं।

2. पडिबुद्धा वि किं करिस्सं। ण मे उवदेसु वि णिअकरणिज्जेसु हत्थपा पसरन्ति। कामो दाणिं सकामो होदु जेण अणज्जसंधे जणे सुद्धहिअआ सही प कारिदा। अहवा दुव्वासस्सावो एसो विआरेदि। अण्णधा कधं सो राएसी तावि पि अस्स कालस्स लेक्खमेत्तं पि ण विसज्जेदि। ता उदं अहिण्णाणं अङ्गु अअं तस्स विसज्जेम। दुक्खसीले तवस्सिजणे को अब्भत्थणाअदु। णं सहीगामो ति व्ववसिदा वि ण पारेमि पत्थाणपडिणिउत्तस्स तादकस्सवस्स दुस्सन्तपरिणादं आवण्ण सत्तं सउन्दलं णिवेदिदुं। इत्थगदे अहोहि किं करणिज्ज।

3. सहि, तुवर तुवर, सउन्दलाए पत्थाणकोदुअं णिव्वत्तिदु।

अनसूया—[1]सखि, कथमेतत् ।

प्रियंवदा—[2]शृणु। इदानीं सुखशायिनपृच्छिका शाकुन्तलासकाशं
ासि ।

अनसूया—[3]ततस्ततः ?

प्रियंवदा—[4]यावदेनां लज्जावनतमुखीं परिष्वज्य तातकाश्यपेनैव-
भिनन्दितम् । दिष्ट्या धूमाकुलितदृष्टेरपि यजमानस्य पावक एवाहुतिः
ता । वत्से, सुशिष्यपरिदत्ता विद्येवाशोचनीयासि संवृत्ता । अद्यैव
परिक्षितां त्वां भर्तुः सकाशं विसर्जयामीति ।

अनसूया—[5]अथ केन सूचितस्तातकाश्यपस्य वृत्तान्तः ?

प्रियंवदा—[6]अग्निशरणं प्रविष्टस्य शरीरं विना छन्दोमय्या वाण्या ।

अनसूया—(साविस्मयम्) [7]कथमिव ?

प्रियंवदा—(संस्कृतमाश्रित्य)

दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः ।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव ॥ ४ ॥

अनसूया—(प्रियंवदामाश्लिष्य) [8]सखि, प्रियं मे । किं त्वद्यैव शाकुन्तला
यत इत्युत्कण्ठासाधारणं परितोषमनुभवामि ।

---

1. सहि कहं एदं । 2. सुणाहि । दाणिं सुहसइरपुच्छिआ सउन्दलासआसं
मि । 3. तदो तदो । 4. जाव एणं लज्जावणदमुहिं परिस्सजिअ तादकस्सवेण
अहिणन्दिदं । दिट्ठिआ धूमाउलिदविट्ठिणो वि जअमाणस्स पावए एव्व आहुदी
दा । वच्छे सुसिस्सापरिदिण्णा विज्जा विअ असोअणिज्जासि संवुत्ता । अज्ज एव्व
रिक्खद तुमं भत्तुणो सआसं विसज्जेमित्ति । 5. अह केण सूइदो तादकस्सवस्स
तो । 6. अग्गिसरणं पविट्ठस्स सरीरं विणा छन्दोमईए वाणिआए । 7. कह
? 8. सहि, पिअं मे । किं अज्ज एव्व सउन्दला णिअदित्ति उक्कण्ठासाहारणं
तोसं अणुहोमि ।

प्रियंवदा—[1]सखि, आवां तावदुत्कण्ठां विनोदयिष्यावः । तपस्विनी निर्वृता भवतु ।

अनसूया—[2]तेन ह्येतस्मिंश्चूतशाखावलम्बिते नालिकेरसमुद्ग एतन्निमित्तमेव कालान्तरक्षमा निक्षिप्ता मया केसरमालिका । तदिमं हस्तमनिहितां कुरु । यावदहमपि तस्यै मृगरोचनां तीर्थमृत्तिं दूर्वाकिसलयानीति मङ्गलसमालम्भनानि विरचयामि ।

प्रियंवदा—[3]तथा क्रियताम् ।

(अनसूया निष्क्रान्ता । प्रियंवदा नाट्येन सुमनसो गृह्णाति ।)

(नेपथ्ये) गौतमि, आदिश्यन्तां शार्ङ्गरवमिश्राः शकुन्तलानयनाय

प्रियंवदा—(कर्णं दत्त्वा)[4] अनसूये, त्वरस्व त्वरस्व । एते खलु हस्तिनापुरगामिन ऋषयः शब्दाय्यन्ते ।

(प्रविश्य समालम्भनहस्ता) **अनसूया**—[5]सखि, एहि । गच्छावः

(इति परिक्रामतः ।)

प्रियंवदा—(विलोक्य)[6] एषः सूर्योदय एव शिखामञ्जिता प्रतीष्टनीवारहस्ताभिः स्वस्तिवाचनिकाभिस्तापसीभिरभिनन्द्यमाना शकुन्तला तिष्ठति । उपसर्पाव एनाम् । (इत्युपसर्पतः ।)

(ततः प्रविशति यथोद्दिष्टव्यापारा आसनस्था शकुन्तला ।)

---

1. सहि, वअं दाव उक्कण्ठं विणोदइस्सामो । सा तवस्सिणी णिव्वुदा होदु । 2. तेण हि एदस्मिं चूदसाहावलम्बिदे णारिएरसमुग्गए एदणिमित्तं एव्व कालन्तरक्खमा णिक्खित्ता मए केसरमालिआ । ता इमं हत्थसण्णिहिदं करेहि । जाव अहंपि से मिअलोअणं तित्थमित्तिअं दुव्वाकिसलआणित्ति मङ्गलसमालम्भणाणि विरएमि । 3. तह करीअदु । 4. अणसूए, तुवरं तुवरं । एदे क्खु हत्थिणाउरगामिणो इसीओ सद्दावीअन्ति । 5. सहि एहि । गच्छम्ह । 6. एसा सुज्जोदए एव्व सिहामज्जिदा पडिच्छिदणीवारहत्थाहिं सोत्तिआणिआहिं तावसीहिं अहिणन्दीअमाणा सउन्दला

तापसीनामन्यतमा—(शकुन्तलां प्रति) [1]जाते, भर्तुर्बहुमानसूचकं देवीशब्दं लभस्व।

द्वितीया—[2]वत्से, वीरप्रसविनी भव।

तृतीया—[3]वत्से, भर्तुर्बहुमता भव।

(इत्याशिषो दत्त्वा गौतमीवर्जं निष्क्रान्ताः।)

सख्यौ—(उपसृत्य) [4]सखि, सुखमज्जनं ते भवतु।

शकुन्तला—[5]स्वागतं मे सख्योः। इतो निषीदतम्।

उभे—(मङ्गलपात्राण्यादाय। उपविश्य) [6]हला, सज्जा भव; यावत्ते मङ्गलसमालम्भनं विरचयावः।

शकुन्तला—[7]इदमपि बहु मन्तव्यम्। दुर्लभमिदानीं मे सखीजनं भविष्यति। (इति बाष्पं विसृजति।)

उभे—[8]सखि, उचितं न ते मङ्गलकाले रोदितुम्।

(इत्यश्रूणि प्रमृज्य नाट्येन प्रसाधयतः।)

प्रियंवदा—[9]आभरणोचितं रूपमाश्रमसुलभैः प्रसाधनैर्विप्रकार्यते।

(प्रविश्योपायनहस्तावृषिकुमारकौ।)

उभे—इदमलंकरणम्। अलंक्रियतामत्रभवती।

(सर्वा विलोक्य विस्मिताः।)

गौतमी—[10]वत्स नारद, कुत एतत्?

1. जादे, भत्तुणो बहुमाणसूअअ महारेइमहं लहेहि। 2. वच्छे, वीरप्पसविणी होहि। 3. वच्छे, भत्तुणो बहुमदा होहि। 4. सहि, सुहमज्जणं ते होदु। 5. सखीअदं। महाणं। इदो णिसीदह। 6. हला, सज्जा होहि। जाव दे मङ्गलसमालम्भणं करेम। 7. इदं पि बहु मन्तव्वं। दुल्लह दाणिं मे सहीजणेण भविस्सदि। 8. सहि, उइअं ण दे मङ्गलकाले रोइदुं। 9. आहरणोइदं रूवं अस्समसुलहेहिं पसाहणेहिं वेप्पआरीअदि। 10. वच्छ णारअ, कुदो एदं?

प्रथमः—तातकाश्यपप्रभावात् ।

गौतमी—[1]किं मानसी सिद्धिः ?

द्वितीयः—न खलु । श्रूयताम् । तत्रभवता वयमाज्ञप्ताः शकुन्तलाहेतोर्वनस्पतिभ्यः कुसुमान्याहर्तेति । तत इदानीं

क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित् ।
अन्येभ्यो वनदेवताकरतलैः पर्वभागोत्थितै-
र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः ॥५॥

प्रियंवदा—(शकुन्तलां विलोक्य) [2]हला, अनयाभ्युपपत्त्या सूचिता ते भर्तृगेहेऽनुभवितव्या राजलक्ष्मीः । (शकुन्तला व्रीडां रूपयति ।)

प्रथमः—गौतम, एह्येहि । अभिषेकानन्तरोत्तीर्णाय काश्यपाय वनस्पतिसेवां निवेदयावः ।

द्वितीयः—तथा । (इति निष्क्रान्तौ ।)

सख्यौ—[3]आर्ये, अनुपयुक्तभूषणोऽयं जनः । चित्रकर्मपरिचयेनाङ्गेषु त आभरणविनियोगं कुर्वः ।

शकुन्तला—[4]जाने वां नैपुणम् । (उभे नाट्येनालंकुरुतः ।)

(ततः प्रविशति स्नानोत्तीर्णः काश्यपः ।)

काश्यपः—

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।

---

1. किं मानसी सिद्धिः ? 2. हला, इमाए अब्भुववत्तीए सूइआ दे भत्तुणो गेहे अणुहवितव्वा रायलच्छी । 3. आर्ये, अणुवजुत्तभूसणो अअं जणो । चित्तकम्मपरि-

वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥६॥

(इति परिक्रामति ।)

सख्यौ—[1]हला शकुन्तले, अवसितमण्डनासि । परिधत्स्व सांप्रतं क्षौमयुगलम् । (शकुन्तलोत्थाय परिधत्ते ।)

गौतमी—[2]जाते, एष त आनन्दपरिवाहिना चक्षुषा परिष्वजमान इव गुरुरुपस्थितः । आचारं तावत्प्रतिपद्यस्व ।

शकुन्तला—(सव्रीडम्) [1]तात, वन्दे ।

काश्यपः—वत्से !

ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव ।
सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि ॥ ७ ॥

गौतमी—[1]भगवन्, वरः खल्वेषः । नाशीः ।

काश्यपः—वत्से ! इतः सद्यो हुतानग्नीन्प्रदक्षिणीकुरुष्व ।

(सर्वे परिक्रामन्ति ।)

काश्यपः—(ऋक्छन्दसाऽऽशास्ते ।)

इमी वेदिं परितः क्लृप्तधिष्ण्याः समिद्धन्तः प्रान्तसंस्तीर्णदर्भाः ।
[2]पप्रथन्तो दुरितं हव्यगन्धैर्वैतानास्त्वां वह्नयः पावयन्तु ॥८॥

प्रतिष्ठस्वेदानीम् । (सदृष्टिक्षेपम्) क्व ते शार्ङ्गरवमिश्राः ?

(प्रविश्य) शिष्याः—भगवन्, इमे स्मः ।

काश्यपः—भगिन्यास्ते मार्गमादेशय ।

---

1. हला सउन्दले, अवसिदमण्डणासि । परिधेहि संपदं खोमजुअलं । 2. जादे, एसो दे आणन्दपरिवाहिणा चक्खुणा परिस्सजन्तो विअ गुरू उवट्ठिदो । आआरं दाव [illegible] । ण आसिसा ।

शार्ङ्गरवः—इत इतो भवती । (सर्वे परिक्रामन्ति ।

काश्यपः—भो भोः ! संनिहितास्तपोवननरवः ।

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥९।

(कोकिलरवं सूचयित्वा ।)

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः ।
परभृतविरुतं कलं यथा प्रतिवचनीकृतमेभिरीदृशम् ॥१०।

(आकाशे ।)

रम्यान्तरः कमलिनीहरितैः सरोभि-
श्छायाद्रुमैर्नियमितार्कमयूखतापः ।
भूयात्कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः ॥ ११ ॥

(सर्वे सविस्मयमाकर्णयन्ति ।)

गौतमी—[1]जाते ज्ञातिजनस्निग्धैरनुज्ञातगमनासि तपोवनदेवताभिः । प्रणम भगवतीः ।

शकुन्तला—(सप्रणामं परिक्रम्य । जनान्तिकम्) [2]हला प्रियंवदे आर्यपुत्रदर्शनोत्सुकाया अप्याश्रमपदं परित्यजन्त्या दुःखेन मे चरणौ पुरतः प्रवर्तेते ।

1. जादे, णादिजणासिणिद्धाहिं अणुण्णादगमणासि तवोवणदेवदाहिं । पणम

प्रियंवदा—[1]न केवलं तपोवनविरहकातरा सख्येव । त्वयोपस्थित-वियोगस्य तपोवनस्यापि तावत्समवस्था दृश्यते !

उद्गलितदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः ।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः ॥ १२ ॥

शकुन्तला—(स्मृत्वा) [2]तात, लतामगिनीं वनज्योत्स्नां तावदा-मन्त्रयिष्ये ।

काश्यपः—अवैमि तेऽस्यां सोदर्यास्नेहम् । इयं तावद्दक्षिणेन ।

शकुन्तला—(उपेत्य लतामालिङ्ग्य) [3]वनज्योत्स्ने चूतसंगतापि मां प्रत्यालिङ्गेतोगताभिः शाखाबाहाभिः । अद्यप्रभृति दूरपरिवर्तिनी ते खलु भविष्यामि !

काश्यपः— संकल्पितं प्रथममेव मया तवार्थे
भर्तारमात्मसदृशं सुकृतैर्गता त्वम् ।
चूतेन संश्रितवती नवमालिकेय-
मस्यामहं त्वयि च संप्रति वीतचिन्तः ॥१३

इतः पन्थानं प्रतिपद्यस्व ।

शकुन्तला—(सख्यौ प्रति) [4]हला, एषा द्वयोर्युवयोर्हस्ते निक्षेपः ।

सख्यौ—[5]अयं जनः कस्य हस्ते समर्पितः ? (इति बाष्पं विसृजतः)

---

1. ण केवलं तवोवणविरहकादरा सक्खी एव्व । तुए उवदिट्ठविओअस्स तवोवणस्स वि दाव समवत्था दीसइ ।

उग्गलिअदब्भकवला मिआ परिच्चत्तणच्चणा मोरा ।
ओसरिअपण्डुपत्ता मुअन्ति अस्सू विअ लदाओ ॥

2. तादं, लतादहिणिअं वणजोसिणिं दाव आमन्तइस्सं । 3. वणजोसिणि, चूदसंगता वि मं पच्चालिङ्ग इदोगदाहिं साहाबाहाहिं अज्जप्पहुदि दूरपरिवत्तिणी दे खु भविस्सं ।

5. अअं जणो कस्स हत्थे समप्पिदो ?

काश्यपः—अनसूये, अलं रुदित्वा । ननु भवतीभ्यामेव स्थिर कर्तव्या शकुन्तला ! (सर्वे परिक्रामन्ति

शकुन्तला—[1]तात, एषोऽहमभ्यन्तचारिणी गर्भमन्थरा मृगवधूर्यद् ऽनघप्रसवा भवति, तदा मयं कमपि प्रियनिवेदयितृकं विसर्जयिष्यथ

काश्यपः—नेदं विस्मरिष्यामः ।

शकुन्तला—(गतिभङ्गं रूपयित्वा) [2]को नु खल्वेष निवसनं सज्जते ? (इति परावर्तते ।)

काश्यपः—वत्से !

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे ।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥ १४ ॥

शकुन्तला—तात ! किं मदवसादित्यागिनीं मामनुसरसि ? अचिरप्रसूतया जनन्या विना वर्धित एव । इदानीमपि मया विरहितं त्वां तातश्चिन्तयिष्यति । निवर्तस्व तावत् । (इति रुदती प्रस्थिता ।)

काश्यपः— उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं
बाष्पं कुरु स्थिरतया विहतानुबन्धम् ।
अस्मिन्नलक्षितनतोन्नतभूमिभागे
मार्गे पदानि खलु ते विषमीभवन्ति ॥१५॥

---

1. तात, एषाऽहमभ्यन्तचारिणी गर्भमन्थरा मृगवधूर्यदा अनघप्रसवा भवति तदा मे कमपि प्रियनिवेदयितारं विसर्जयिष्यथ । 2. को नु खल्वेष निवसने मे सज्जते ?

शार्ङ्गरवः—भगवन् ! ओदकान्तात् स्निग्धो जनोनुगन्तव्य इति यतं । तदिदं सरस्तीरम् । अत्र संदिश्य प्रतिगन्तुमर्हसि ।

काश्यपः—तेन हीमां क्षीरवृक्षच्छायामाश्रयामः ।

(सर्वे परिक्रम्य स्थिताः ।)

काश्यपः—(आत्मगतम्) किं नु खलु तत्रभवतो दुष्यन्तस्य तत्स्वरूपमस्माभिः संदेष्टव्यम् ? (चिन्तयति)

शकुन्तला—(जनान्तिकम्) [1]हला, पश्य । नलिनीपत्रान्तरितमपि इचरमपश्यन्त्यातुरा चक्रवाक्यारटति दुष्करमहं करोमीति ।

अनसूया—[2]सखि, मैवं मन्त्रयस्व ।

एषापि प्रियेण विना गमयति रजनीं विषाददीर्घतराम् ।
गुर्वपि विरहदुःखमाशाबन्धुः साहयति ॥ १६ ॥

काश्यपः—शार्ङ्गरव, इति त्वया मद्वचनात्स राजा शकुन्तलां प्रकृत्य वक्तव्यः ;—

शार्ङ्गरवः—आज्ञापयतु भगवान् ।

काश्यपः—

अस्मान्साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतःपरं न खलु तद्वाच्यं वधूबन्धुभिः ॥१७॥

शार्ङ्गरवः—गृहीतः संदेशः ।

---

1. हला पेक्ख । णलिणीपत्तन्तरिदं वि सहअरं अपेक्खन्ती आदुरा चक्कवाई एदिं दुक्करं अहं करेमीति । 2. सहि, मा एवं मन्तेहि ।

एसा वि पिएण विणा गमेइ रअणिं विसाअदीहअरं ।
गरुई वि विरहदुक्खं आसाबन्धो सहावेदि ॥

काश्यपः—वत्से, त्वमिदानीमनुशासनीयासि । वनौकसोऽपि सन्तो लौकिकज्ञा वयम् ।

शार्ङ्गरवः—न खलु धीमतां कश्चिदविषयो नाम !

काश्यपः—मा त्वमितः पतिकुलं प्राप्य,

शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥ १८ ॥

कथं वा गौतमी मन्यते ?

गौतमी—[1]एतावान्वधूजनस्योपदेशः । जाते, एतत्खलु सर्वमवधारय

काश्यपः—वत्से, परिष्वजस्व मां सखीजनं च ।

शकुन्तला—[2]तात, इत एव किं प्रियंवदानसूये सख्यौ निवर्तिष्येते ?

काश्यपः—वत्से, इमे अपि प्रदेये । न युक्तमनयोस्तत्र गन्तुम् त्वया सह गौतमी यास्यति ।

शकुन्तला—(पितरमाश्लिष्य) [3]कथमिदानीं तातस्याङ्कात्परिभ्रष्टा मलयनटोन्मूलिता चन्दनलतेव देशान्तरे जीवितं धारयिष्यामि ?

काश्यपः—वत्से, किमेवं कातरासि ?

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला ।
तनयमचिरात्प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ॥ १९ ॥

---

1. एत्तिओ वहूजणस्स उवदेसो । जादे एदं वसु सव्वं ओधारेहि । 2. ताद, किं पियंवदाणसूआओ सहीओ णिवत्तिस्सन्ति । 3. कहं दाणिं तादस्स

(शकुन्तला पितुः पादयोः पतति ।)

काश्यपः—यदिच्छामि ते तदस्तु ।

शकुन्तला—(सख्यावुपेत्य) [1]हला, द्वे अपि मां सममेव परिष्वजेताम्

सख्यौ—(तथा कृत्वा) [2]सखि, यदि नाम स राजा प्रत्यभिज्ञान-मन्थरो भवेत्ततस्तस्मायिदमात्मनामधेयाङ्कितमङ्गुलीयकं दर्शय ।

शकुन्तला—[3]अनेन संदेहेन वामाकम्पितास्मि !

सख्यौ—[4]मा भैषीः ! अतिस्नेहः पापशङ्की !

शार्ङ्गरवः—युगान्तरमारूढः सविता । त्वरतामत्रभवती ।

शकुन्तला—(आश्रमाभिमुखी स्थित्वा,) [5]तात, कदा नु भूयस्तपोवनं प्रेक्षिष्ये ?

काश्यपः—श्रूयताम् !

भूत्वा चिराय चतुरन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं निवेश्य ।
भर्त्रा तदर्पितकुटुम्बभरेण सार्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ॥२०॥

गौतमी—[6]जाते, परिहीयते गमनवेला ! निवर्तय पितरम् ; अथवा चिरेणापि पुनः पुनरेवैवं मन्त्रयिष्यते । निवर्ततां भवान् ।

काश्यपः—वत्से, उपरुध्यते तपोऽनुष्ठानम् ।

---

1. हला, दुवे वि म ममं एव्व परिरभजह । 2. सहि जइ णाम सो राआ पच्चहिण्णाणमन्थरो भवे, तदो से इमं अत्तणामहेआङ्कि अं अङ्गुलीअअं दसेहि । 3. हिअएण संदेहेण वो आकम्पिदम्हि । 4. मा भाआहि । अदिसिणेहो पावसङ्की । 5. ताद, कदा णु भूओ तवोवणं पेक्खिस्सं ? 6. जादे, परिहीअदि गमणवेला । णिवत्तेहि पिदरं । अहवा चिरेण वि पुणो पुणो एसा एव्व मन्तइस्सदि । णिवत्तदु भवं ।

शकुन्तला—(भूयः पितरमाश्लिष्य) 'तपश्चरणपीडितं तातशरीरम् तन्मातिमात्रं मम कृत उत्कण्ठस्व !

काश्यपः—(सनिःश्वासम्।)

शममेष्यति मम शोकः कथं नु वत्से त्वया रचितपूर्वम्
उटजद्वारविरूढं नीवारबलिं विलोकयतः ॥२१॥

गच्छ । शिवास्ते पान्थानः सन्तु ।

(निष्क्रान्ता शकुन्तला सहयायिनश्च ।)

सख्यौ—(शकुन्तलां विलोक्य) 'हा धिक् हा धिक् ! अन्तर्हिता शकुन्तला वनराज्या ।

काश्यपः—(सनिःश्वासम्) अनसूये, गतवती वां सहचारिणी ! निगृह्य शोकमनुगच्छतं मां प्रस्थितम् ।

उभे—'तात, शकुन्तलाविरहितं शून्यमिव तपोवनं कथं प्रविशामः?

काश्यपः—स्नेहप्रवृत्तिरेवंदर्शिनी । (सविमर्शं परिक्रम्य) हन्त भोः ! शकुन्तलां पतिकुलं विसृज्य लब्धमिदानीं स्वास्थ्यम् । कुतः ;

अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा ॥२२॥ (निष्क्रान्ताः सर्वे ।)

इति चतुर्थोऽङ्कः ।

---

1. तवच्चरणपीडिदं तादसरीरं । ता मा अदिमेत्तं मम किदे उक्कण्ठस्स ।
2. हद्धी हद्धी । अन्तलिहिदा सउन्दला वणराईए । 3. ताद, सउन्दलाविरहिदं

पञ्चमोऽङ्कः ।

(ततः प्रविशत्यासनस्थो राजा विदूषकश्च ।)

विदूषकः—(कर्णं दत्त्वा)[1] भो वयस्य, संगीतशालान्तरेऽवधानं देहि । अविशुद्धाया गीतेः स्वरसंयोगः श्रूयते । जाने तत्रभवती हंसपदिका र्णपरिचयं करोतीति ।

राजा—तूष्णीं भव । यावदाकर्णयामि । (आकाशे गीयते ।)

अभिनवमधुलोलुपस्त्वं तथा परिचुम्ब्य चूतमञ्जरीम् ।
कमलवसतिमात्रनिर्वृतो मधुकर विस्मृतोऽस्येनां कथम्॥१॥

राजा—अहो ! रागपरिवाहिणी गीतिः ।

विदूषकः—[2]किं तावद्गीत्या अवगतोऽक्षरार्थः ?

राजा—(स्मितं कृत्वा) सकृत्कृतप्रणयोऽयं जनः । तदस्या देवीं सुमतीमन्तरेण मदुपालम्भमवगतोऽसि । सखे माधव्य, मद्वचनाच्यतां हंसपदिका । निपुणमुपालब्धोऽसीति ।

विदूषकः—[3]यद्भवानाज्ञापयति । (उत्थाय) भो वयस्य, गृहीतस्य या परकीयैर्हस्तैः शिखण्डके ताड्यमानस्याप्सरसा वीतरागस्येव ास्तीदानीं मे मोक्षः !

राजा—गच्छ । नागरिकवृत्त्या संज्ञापयैनाम् ।

विदूषकः—[4]का गतिः ! (इति निष्क्रान्तः)

---

1. भो वअस्स, संगीतसालन्तरे अवधाणं देहि । कलविसुद्धाए गीदीए सरसंजोओ ीअदि । जाणे तत्तहोदी हंसवदिआ वण्णपरिअअं करेदि त्ति ।

अहिणवमहुलोलुवो तुमं तह परिचुम्बिअ चूअमञ्जरिं ।
कमलवसइमेत्तणिव्वुदो महुअर विस्सरिदो सि णं कहं ॥

2. किं दाव गीदीए अवगओ अक्खरत्थो । 3. जं भवं आणवेदि । भो वअस्स, दस्स ताए परकीएहिं हत्थेहिं सिहण्डए ताडीअमाणस्स अच्छराए वीदराअरस ।णत्थि दाणिं मे मोक्खो ! 4. का गई !

राजा—(आत्मगतम्) किं नु खलु गीतमेवंविधार्थपाकर्ण्येदृशन-विरहादतेऽपि बलवदुत्कण्ठितोऽस्मि ! अथवा ;

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दा-
न्पर्युत्सुको भवति यत्सुखितोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि ॥ २ ॥

(इति पर्याकुलस्तिष्ठति ।)

(प्रविश्य) **कञ्चुकी**—अहो नु खल्वीदृशीमवस्थां प्रतिपन्नोऽस्मि !

आचार इत्यवहितेन मया गृहीता
या वेत्रयष्टिरवरोधगृहेषु राज्ञः ।
काले गते बहुतिथे मम सैव जाता
प्रस्थानविक्लवगतेरवलम्बनार्थम् ॥ ३ ॥

भोः ! कामं धर्मकार्यमनतिपात्यं दैवस्य । तथापीदानीमेव धर्मासना-दुत्थिताय पुनरुपरोधकारि कण्वशिष्यागमनमस्मै नोत्सहे निवेदयितुम् । अथवाऽविश्रमोऽयं लोकतन्त्राधिकारः ! कुतः ।

भानुः सकृद्युक्ततुरङ्ग एव रात्रिंदिवं गन्धवहः प्रयाति ।
शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपि धर्म एषः ॥४॥

यावन्नियोगमनुतिष्ठामि । (परिक्रम्यावलोक्य च) एष देवः —

प्रजाः प्रजाः स्वा इव तन्त्रयित्वा निषेवतेऽशान्तमना विविक्तम् ।
यूथानि संचार्य रविप्रतप्तः शीतं दिवा स्थानमिव द्विपेन्द्रः ॥५॥

(उपगम्य) जयतु जयतु देवः । एतं खलु हिमगिरिरुपत्यकारण्यवासिनः

राजा—(सादरम्) किं काश्यपसंदेशहारिणः ?

कञ्चुकी—अथ किम् ।

राजा—तेन हि मद्वचनाद्विज्ञाप्यतामुपाध्यायः सोमरातः । अमूनाश्रमवासिनः श्रौतेन विधिना सत्कृत्य स्वयमेव प्रवेशयितुमर्हसीति । अहमप्यत्र तपस्विदर्शनोचिते प्रदेशे स्थितः प्रतिपालयामि ।

कञ्चुकी—यदाज्ञापयति देवः । (इति निष्क्रान्तः ।)

राजा—(उत्थाय) वेत्रवति, अग्निशरणमार्गमादेशय ।

प्रतीहारी—'इत इतो देवः । 1. इदो इदो देवो ।।

राजा—(परिक्रामति । अधिकारखेदं निरूप्य) सर्वः प्रार्थितमर्थमधिगम्य सुखी संपद्यते जन्तुः; राज्ञां तु चरितार्थता दुःखोत्तरैव ।

औत्सुक्यमात्रमवसाययति प्रतिष्ठा
क्लिश्नाति लब्धपरिपालनवृत्तिरेव ।
नातिश्रमापनयनाय यथा श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रम् ॥ ६ ॥

(नेपथ्ये) **वैतालिकौ**—विजयतां देवः ।

प्रथमः—स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते वृत्तिरेवंविधैव ।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम् ॥७॥

द्वितीयः—नियमयसि विमार्गप्रस्थितानात्तदण्डः
प्रशमयसि विवादं कल्पसे रक्षणाय ।
अतनुषु विभवेषु ज्ञातयः सन्तु नाम
त्वयि तं परिसमाप्तं बन्धुकृत्यं प्रजानाम् ॥८॥

राजा—एते क्लान्तमनसः पुनर्नवीकृताः स्मः । (इति परिक्रामति

प्रतीहारी—[1]'एष अभिनवसंमार्जनसश्रीकः संनिहितहोमधेनुरग्नि-शरणालिन्दः । आरोहतु देवः ।

राजा—(आरुह्य परिजनांसावलम्बी तिष्ठति ।) वेत्रवति, किमुद्दिश्य भगवता काश्यपेन मत्सकाशमृषयः प्रेषिताः स्युः ?

किं तावद्व्रतिनामुपोढतपसां विघ्नैस्तपो दूषितं
धर्मारण्यचरेषु केनचिदुत प्राणिष्वमच्चेष्टितम् ।
आहोस्वित्प्रमवो ममापचरितैर्विश्लम्भितो वीरुधा-
मित्यारूढबहुप्रतर्कमपरिच्छेदाकुलं मे मनः ॥ ९ ॥

प्रतीहारी—[1]'सुचरितनन्दिन ऋषयो देवं सभाजयितुमागता इति तर्कयामि ।

(ततः प्रविशन्ति गौतमीसहिताः शकुन्तलां पुरस्कृत्य मुनयः । पुरश्चैषां कञ्चुकी पुरोहितश्च ।)

कञ्चुकी—इत इतो भवन्तः ।

शार्ङ्गरवः—शारद्वत,

महाभागः कामं नरपतिरभिन्नस्थितिरसौ
न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते ।
तथापीदं शश्वत्परिचितविविक्तेन मनसा
जनाकीर्णं मन्ये हुतवहपरीतं गृहमिव ॥ १० ॥

शारद्वतः—स्थाने भवान्पूरप्रवेशादित्थंभूतः संवृत्तः । अहमपि

---

1 ... अग्गिसरणालिन्दो मणिहिदहोमधेणू अग्गिसरणालिन्दो ।

अभ्यक्तमिव स्नातः शुचिरशुचिमिव प्रबुद्ध इव सुप्तम् ।
बद्धमिव स्वैरगतिर्जनामिह सुखसङ्गिनमवैमि ॥ ११ ॥

शकुन्तला—(निमित्तं सूचयित्वा) 'अहो ! किं मे वामेतरं नयनं विस्फुरति?

गौतमी—'जाते, प्रतिहतममङ्गलम् । शुभानि ते भर्तृकुलदेवता वितरन्तु । । (इति परिक्रामति ।)

पुरोहितः—(राजानं निर्दिश्य) भो भोस्तपस्विनः, असावत्रभवा-न्वर्णाश्रमाणां रक्षिता प्रागेव मुक्तासनो वः प्रतिपालयति । पश्यतैनम् ।

शार्ङ्गरवः—भो महाब्राह्मण, काममेतदभिनन्दनीयं तथापि वयमत्र माध्यस्थाः । कुतः ।

भवन्ति नम्रास्तरवः फलागमैर्नवाम्बुभिर्दूरविलम्बिनो घनाः ।
ताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम् ॥

प्रतीहारी—'देव, प्रसन्नमुखवर्णा दृश्यन्ते । जानामि विश्रब्धकार्या इयः ।

राजा—(शकुन्तलां दृष्ट्वा) अथात्रभवती ?

का स्विदवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या ।
मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम् ॥१२॥

प्रतीहारी—'देव, कुतूहलगर्भः प्रहितो न मे तर्कः प्रसरति । नन्वर्शनीया पुनरस्या आकृतिर्लक्ष्यते !

राजा—भवतु । अनिर्वर्णनीयं परकलत्रम् !

---

1. अम्महे ! किं मे वामेदरं णअणं विप्फुरदि ? 2. जादे, पडिहदं अमङ्गलं । हादं दे भत्तुकुलदेवदाओ वितरन्दु । 3. देव पसण्णमुहवण्णा दीसन्ति । जाणामि सउणकज्जा इसीओ । 4. देव, कुतूहलगब्भो पहिदो ण मे तक्को पसरदि । णं उणाहि उण से आकिदी लक्खीअदि ।

शकुन्तला—(हस्तमुरसि कृत्वा। आत्मगतम्) 'हृदय, किमेवं वेपसे आर्यपुत्रस्य भावमवधार्य धीरं तावद्भव।

पुरोहितः—(पुरो गत्वा) एते विधिवदर्चितास्तपस्विनः। कश्चिदेषामुपाध्यायसंदेशः। नं देवः श्रोतुमर्हति।

राजा—अवहितोऽस्मि।

ऋषयः—(हस्तानुद्यम्य) विजयस्व राजन्!

राजा—मूर्ध्नाभिवादये।

ऋषयः—इष्टेन युज्यस्व!

राजा—अपि निर्विघ्नतपसो मुनयः?

ऋषयः—कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि।
तमस्तपति घर्मांशौ कथमाविर्भविष्यति॥ १४।

राजा—अर्थवान्खलु मे राजशब्दः। अथ भगवाँल्लोकानुग्रहाय कुशली काश्यपः?

ऋषयः—स्वाधीनकुशलाः सिद्धिमन्तः! स भवन्तमनामयप्रश्नपूर्वकमिदमाह।

राजा—किमाज्ञापयति भगवान्?

शार्ङ्गरवः—यन्मिथःसमयादिमां मदीयां दुहितरं भवानुपायंस्तन्मया प्रीतिमता युवयोरनुज्ञातम्। कुतः।

त्वमर्हतां प्राग्रसरः स्मृतोऽसि नः
शकुन्तला मूर्तिमती च सत्क्रिया।
समानयंस्तुल्यगुणं वधूवरं
चिरस्य वाच्यं न गतः प्रजापतिः॥ १५॥

तदिदानीमापन्नसत्त्वेयं प्रतिगृह्यतां सहधर्मचरणायेति ।

गौतमी—[1]आर्य, किमपि वक्तुकामास्मि । न मे वचनावसरोऽस्ति ।

कथमिति

नापेक्षितो गुरुजनोऽनया त्वया पृष्टो न बन्धुजनः ।
एकैकमेव चरिते भणामि किमेककमेकस्मै ॥ १६ ॥

शकुन्तला—(आत्मगतम्) [2]किं नु खल्वार्यपुत्रो भणति ?

राजा—किमिदमुपन्यस्तम् ?

शकुन्तला—(आत्मगतम्) [3]पापकः खलु वचनोपन्यासः !

शार्ङ्गरवः—कथमिदं नाम ? सकल एवायं पौरवकुलस्योत्कृष्टानिष्टशङ्कानाः ।

सतीमपि ज्ञातिकुलैकसंश्रयां
जनोऽन्यथा भर्तृमतीं विशङ्कते ।
अतः समीपे परिणेतुरिष्यते
प्रियाऽप्रिया वा प्रमदा स्वबन्धुभिः ॥ १७ ॥

राजा—किमत्रभवती मया परिणीतपूर्वा ?

शकुन्तला—(सविषादम् । आत्मगतम्) [4]हृदय, सांप्रतं त आशङ्का ।

शार्ङ्गरवः—किं कृतकार्यद्वेषाद्धर्मं प्रति विमुखतोचिता राज्ञः ?

राजा—कुतोऽयमसत्कल्पनाप्रश्नः ?

शार्ङ्गरवः—मूर्च्छन्त्यमी विकाराः प्रायेणैश्वर्यमत्तेषु ॥ १८ ॥

राजा—विशेषेणाधिक्षिप्तोऽस्मि ।

---

1. अज्ज, किपि वत्तुकामास्मि ? ण मे वअणावसरो अत्थि । कहं,
णावेक्खिओ गुरुअणो इमाए तुए पुच्छिदो ण बन्धुअणो ।
एक्कक्कमेव्व चरिए भणामि किं एक्कमेक्कस्स ॥
2. किं णु खलु अज्जउत्तो भणादि ? 3. पावओ खलु वअणोवण्णासो । 4. हिअअ, सप्पदं दे आसङ्का ।

गौतमी—[1]जादे, मुहूर्तं मा लज्जस्व । अपनेष्यामि तावत्ते अवगुण्ठनम् । ततस्त्वां भर्ताभिज्ञास्यति । (यथोक्तं करोति ।)

राजा—(शकुन्तलां निर्वर्ण्य । आत्मगतम् ।)

इदमुपनतमेवं रूपमक्लिष्टकान्ति
प्रथमपरिगृहीतं स्यान्न वेत्यव्यवस्यन् ।
भ्रमर इव विभाते कुन्दमन्तस्तुषारं
न च खलु परिभोक्तुं नापि शक्नोमि हातुम् ॥१९॥

(इति विचारयन्स्थितः)

प्रतीहारी— अहो धर्मपत्निता भर्तुः ! ईदृशं नाम सुखोपनतं रूपं दृष्ट्वा [2]कथं विचार्यति ?

शार्ङ्गरवः—[3]किं गतेन, किमिति नोपमाम्यते ?

राजा—[4]सोत्प्रासवचनाः, चिन्तयन्नपि न खलु प्रत्याकरणमत्रभवत्याः स्मरामि । तत्स्मरामि तामभिमुखमत्यक्षलक्षणां प्रत्यात्मानं क्षेत्रिणमाशङ्कमानः प्रार्थयितुं यै ?

शकुन्तला—(अपवार्य) [5]अनार्य परिणय एव संदेहः ! कुत इदानीं मे दृष्टविग्रहिष्यामि ?

शार्ङ्गरवः—मा तावत् ।

कृताभिमर्शामनुमन्यमानः सुतां त्वया नाम मुनिर्विमान्यः ।
मुष्टं प्रतिग्राहयता स्वमर्थं पात्रीकृतो दस्युरिवासि येन ॥२०॥

1. जादे, मुहुत्तं मा लज्ज । अवणइस्सं दाव दे ओउण्ठणं । तदो तुमं भट्टा अहिजाणिस्सदि । 2. अहो धम्मपत्तिदा भट्टिणो । ईदिसं णाम सुहोवणदं रूवं दिट्ठा कधं विआरेदि ? 3. अज्जस्स परिणए एव्व संदेहो । कुदो तावं मे

शारद्वतः—शार्ङ्गरव, विरम त्वमिदानीम् । शकुन्तले, वक्तव्यमुक्तास्माभिः । सोऽयमत्रभवानेवमाह । दीयतामस्मै प्रत्ययप्रतिवचनम् ।

शकुन्तला—(अपवार्य) 'इदमवस्थान्तरं गते तादृशेऽनुरागे किं तापरिवेदनेन ? आत्मेदानीं मे शोचनीय इति व्यवसितमेतत् । (प्रकाशम्) अनार्यपुत्र—(इत्यर्धोक्ते) संशयित इदानीं परिणये जन समुदाचारः । अयि रेव, युक्तं नाम ते तथा पुराश्रमपदे सद्भावोत्तानहृदयमिमं जनं विस्रम्भपूर्वं प्रवार्य सांप्रतमीदृशैरक्षरैः प्रत्याख्यातुम् ?

राजा—(कर्णौ पिधाय) शान्तं पापम् !

व्यपदेशमाविलयितुं किमीहसे जनमिमं च पातयितुम् ।
कूलंकषेव सिन्धुः प्रसन्नमम्भस्तटतरुं च ॥ २१ ॥

शकुन्तला—'भवतु । यदि परमार्थतः परपरिग्रहशङ्किना त्वयैवं वृत्तं, तदभिज्ञानेनानेन तवाशङ्कामपनेष्यामि ।

राजा—उदारः कल्पः !

शकुन्तला—(मुद्रास्थानं परामृश्य) 'हा धिक् ! हा धिक् ! अङ्गुलीयकशून्या मेऽङ्गुलिः ! (इति सविषादं गौतमीमवेक्षते ।)

गौतमी—'नूनं ते शक्रावतारात्यन्तरे शचीतीर्थसलिलं वन्दमानायाः भ्रष्टमङ्गुलीयकम् !

1. इमं अवत्थन्तरं गदे तादिसे अणुराए किं वा सुमरावेदि ? अत्ता दाणिं सोअणीओ त्ति ववसिदं एदं । अज्जउत्त, संभवदे दाणिं परिणए ण एसो समुदाआरो । रेव, जुत्तं णाम दे तह पुरा अस्समपदे सब्भावुत्ताणहिअअं इमं जणं समअपुव्वं पत्ताअ संपदं इदिसेहिं अक्खरेहिं पच्चाचक्खिदुं । 2. होदु, जइ परमत्थतो परपरिग्गहङ्केण तुए एव्वं पउत्तं ता अहिण्णाणेण इमिणा तुह आसङ्कं अवणइस्सं । 3. हद्धी ! ो ! अङ्गलीअअसुण्णा मे अङ्गली ! 4. णूणं दे सक्कावदारब्भन्तरे सचीतित्थसलिलं

राजा— (सस्मितम्) इदं तन्मत्युत्पन्नमति स्त्रीगमिति यदुच्यते।

शकुन्तला—'अत्र नावक्षिपता दर्शितं प्रभुत्वम् ! अपरं ते
ाख्यिष्यामि ।

राजा—श्रोतव्यमिदानीं संवृत्तम् ।

शकुन्तला—'नन्वेकस्मिन्दिवसे नवमालिकामण्डपे नलिनीपत्र
भाजनगतमुदकं तव हस्ते संन्यस्तमासीत् ।

राजा—शृणुमस्तावत् ।

शकुन्तला—'तस्मिन्नेव मे पुत्रकृतको हरिणपोतको नाम मृगपोत
उपस्थितः । त्वयायं नावबुद्धमपि पिबतिव्यनुकम्पिनोपच्छन्दित उदकेन।
न पुनर्मेऽभिनिवेशविश्वासमुपगतः । पश्चात्त्वमित्येव मया गृहीत
मल्लिकेऽनेन वृत्तः प्रणयः । तदा त्वयि प्रहसितोऽसि । गर्वः समन्यैषु
विश्वसिति । द्वावप्यात्मगतावित्ति ।

राजा—एवं विधिमिरात्मकार्यनिर्वर्तिनीनामनृतमगवाङ्मधुभिराङ्क्ष्य-
न्ते विषयिणः !

गौतमी—'महाभाग, नार्हत्येनं प्रत्याख्यातुम् । नवोपनयवर्धितोऽन-
भिज्ञोऽयं जनः कृतवत्सु ।

राजा—तापसवृद्धे,

---

1. एत्थ दाव विहिणा अणिट्ठं पि णारीजणं। तदा किं पुरिसेसु। 2. णं एक्कस्मिं दिअहे णोमालिआमण्डवे पिअदमा णलिणीपत्तभाअणगदं उअअं तुह हत्थे संण्णासिदं आसि। 3. तदप्पभिदं मे पुत्तअओ मिअपोदओ दुवेट्ठओ। तुए अअं दाव पढमं पिअउ त्ति अणुकम्पिणा उवच्छन्दिओ उअअं पाअं। ण उणो मे अवरिचिआओ हत्थब्भासं उवगदो। पच्छा तस्मिं एव्व मए गहिदे मल्लिके णेण णिहो पणओ। तदा तुमं हत्थं पहसिदो सि। तस्सो अत्तणो वि विस्सासिणो दोसेण। ण आरेणआ सि। 4. महाभाअ ण

स्त्रीणामशिक्षितपटुत्वममानुषीषु
संदृश्यते किमुत याः प्रतिबोधवत्यः ।
प्रागन्तरिक्षगमनात्स्वमपत्यजात-
मन्यैर्द्विजैः परभृताः खलु पोषयन्ति ॥२२॥

शकुन्तला—(सरोषम्) 'अनार्य, आत्मनो हृदयानुमानेन प्रेक्षसे । क इदानीमन्यो धर्मध्वजप्रवेशितमन्तृणच्छन्नकूपोपमस्य तवानुकृतिं प्रतिपत्स्यते ?

राजा—(आत्मगतम्) संदिग्धबुद्धिं मां कुर्वन्नकैतव इवास्याः कोपो लक्ष्यते । तथा ह्यनया

मय्येव विस्मरणदारुणचित्तवृत्तौ
वृत्तं रहः प्रणयमप्रतिपद्यमाने ।
भेदाञ्चवोः कुटिलयोरलिलोहिताक्ष्या
भग्नं शरासनमिवातिरुषा स्मरस्य ॥ २३ ॥

(प्रकाशम्) भद्रे, प्रथितं कुरुवंशस्य चरितम् । तथापीदं न लक्षये।

शकुन्तला—[1]सुट्ठु तावदयं स्वच्छन्दचारिणी कृतास्मि, **याहमस्य** पुरुवंशप्रत्ययेन मृदुमधोर्हृदयविपरीतं हस्ताभ्यामुपगता !

(पटान्तेन मुखमावृत्य रोदिति)

शार्ङ्गरवः—इत्थमात्मकृतं चापलं दहति ।

अतः परीक्ष्य कर्तव्यं विशेषात्संगतं रहः ।
अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ॥२४॥

---

1. अणज्ज, अत्तणो हिअआणुमाणेण पेक्खसि 'को णाम अण्णो धम्मकञ्चुअप्पवेसिणो तिणच्छण्णकूवोवमस्स । तव अणुकिदिं पडिवादिस्सदि । 2. सुट्ठु दाव अत्त अच्छन्दचारिणी विदामि, जा अहं इमस्स पुरुवंसप्पच्चएण मुहमहुणो, हिअअविसस्स

राजा—अयि भोः, किमत्र भवतीप्रत्यायदेवास्मान्संयुतदोषाक्षरैः क्षिणुथ

शार्ङ्गरवः—(सासूयम्) श्रुतं भवद्भिरधरोत्तरम् ।

आ जन्मनः शाठ्यमशिक्षितो यस्तस्याप्रमाणं वचनं जनस्य ।
परातिसंधानमधीयते यैर्विद्येति ते सन्तु किलाप्तवाचः ॥२५॥

राजा—भोः मन्यवाक्षिन्, अभ्युपगतं तावदस्माभिरेवम् । किं पुनरिमामतिसंधाय लभ्यते ?

शार्ङ्गरवः—विनिपातः ।

राजा—विनिपातः पौरवैः प्रार्थ्यत इति न श्रद्धेयमेतत् ।

शारद्वतः—शार्ङ्गरव, किमुत्तरेण ? अनुष्ठितो गुरोः संदेशः । प्रतिनिवर्तामहे वयम् । (राजानं प्रति,)

तदेषा भवतः कान्ता त्यज वैनां गृहाण वा ।
उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी ॥ २६ ॥

गौतमि, गच्छाग्रतः । (प्रस्थिताः ।)

शकुन्तला—[1]कथमनेन कितवेन विप्रलब्धास्मि ! यूयमपि मां परित्यजथ ? (इत्यनुप्रतिष्ठते ।)

गौतमी—[2](स्थित्वा) वत्स शार्ङ्गरव, अनुगच्छतीयं खलु नः करुणपरिदेविनी शकुन्तला ! प्रत्यादेशपरुषे भर्तरि किं वा मे पुत्रिका करोतु !

शार्ङ्गरवः—(सरोषं निवृत्य) किं पुरोभागे, स्वातन्त्र्यमवलम्बसे !

(शकुन्तला भीता वेपते ।)

शार्ङ्गरवः—शकुन्तले,

---

1. कहं इमिणा कितवेण विप्पलद्धम्हि ! तुम्हे वि मं परिच्चअह ? 2. वच्छ सङ्गरव, अणुगच्छदि इअं क्खु णो करुणपरिदेविणी सउन्तला ! पच्चादेसपरुसे भत्तरि किं वा मे

यदि यथा वदति क्षितिपस्तथा
त्वमसि किं पितुरुत्कुलया त्वया ।
अथ तु वेत्सि शुचि व्रतमात्मनः
पतिकुले तव दास्यमपि क्षमम् ॥२७॥

तिष्ठ । साधयामो वयम् ।

राजा—भोस्तपस्विन्, किमत्रभवतीं विप्रलभसे ?

कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव ।
वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः ॥ २८ ॥

शार्ङ्गरवः—यदा तु पूर्ववृत्तमन्यसङ्गाद्विस्मृतो भवांस्तदा कथ-
ंधर्मभीरुः ?

राजा—भवन्तमेवात्र गुरुलाघवं पृच्छामि ।

मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये ।
दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांसुलः ॥२९॥

पुरोहितः—(विचार्य) यदि तावदेवं क्रियताम् ।

राजा—अनुशास्तु मां भवान् ।

पुरोहितः—अत्रभवती तावदाश्रमपदादस्मद्गृहे तिष्ठतु । कुत इदमुच्यत
ति चेत् ; त्वं साधुभिरादिष्टपूर्वः प्रथममेव चक्रवर्तिनं पुत्रं जनयिष्यसीति।
न चेन्मुनिदौहित्रस्तल्लक्षणोपपन्नो भविष्यति, अभिनन्द्य शुद्धान्तमेनां
प्रवेशयिष्यसि । विपर्यये तु, पितुरस्याः समीपनयनमवस्थितमेव ।

राजा—यथा गुरुभ्यो रोचते ।

पुरोहितः—वत्से, अनुगच्छ माम् ।

शकुन्तला—[1]भगवति वसुधे, देहि मे विवरम् !

---

1. भअवदि वसहे देहि मे विवर !

(इति रुदती प्रस्थिता । निष्क्रान्ता सह पुरोधसा तपस्विभिश्च । राजा आपन्नवहितस्मृतिः शकुन्तलागतमेव चिन्तयति ।)

(नेपथ्ये) आश्चर्यमाश्चर्यम् !

राजा—(आकर्ण्य) किं नु खलु स्यात् ?

(प्रविश्य) **पुरोहितः**—(सविस्मयम्) देव, अद्भुतं खलु संवृत्तम्

राजा—किमिव ?

पुरोहितः—देव, परावृत्तेषु तपस्विकन्येषु

सा निन्दन्ती स्वानि भाग्यानि बाला
बाहूत्क्षेपं क्रन्दितुं च प्रवृत्ता।

राजा—किं च ?

पुरोहितः—स्त्रीसंस्थानं चाप्सरस्तीर्थमारा-
दुत्क्षिप्यैनां ज्योतिरेकं जगाम ॥३०॥

(सर्वे विचार्य कथयन्ति)

राजा—भगवन्, प्रागपि नोऽस्माभिरार्यैः प्रत्यादिष्ट एव । किं वृथा तर्केणान्विष्यते ? विश्राम्यतु भगवान् ।

पुरोहितः—(विलोक्य) विजयस्व । (निष्क्रान्तः ।

राजा—वेत्रवति, पर्याकुलोऽस्मि । शयनभूमिमार्गमादेशय ।

प्रतीहारी—इत इतो देवः । (इति प्रस्थिता ।

राजा—कामं प्रत्यादिष्टां गणयामि न परिग्रहं मुनेस्तनयाम्
बलवत्तु दूयमानं प्रत्याययतीव मां हृदयम् ॥३१॥

(इति निष्क्रान्ताः सर्वे)

पञ्चमोऽङ्कः ।

षष्ठोऽङ्कः

(ततः प्रविशति नागरिकः श्यालः, पश्चाद्बद्धं पुरुषमादाय रक्षिणौ च।)

रक्षिणौ—(पुरुषं ताडयित्वा) [1]अरे कुम्भीरक, कथय कुत्र त्वयैतन्मणिबन्धनोत्कीर्णनामधेयं राजकीयमङ्गुलीयकं समासादितम्।

पुरुषः—(भीतिनाटितकेन) [2]प्रसीदन्तु भावमिश्राः। नाहमीदृशकर्मकारी।

प्रथमः—[3]किं शोभनो ब्राह्मण इति कृत्वा राज्ञा प्रतिग्रहो दत्तः?

पुरुषः—[4]शृणुतेदानीम्। अहं शाकावतारामन्तरवासी धीवरः।

द्वितीयः—[5]पाटच्चर, किमस्माभिर्भणितिः पृष्टा?

श्यालः—[6]सूचक कथयतु सर्वमनुक्रमेण। मैनमन्तरा प्रतिबध्नीत।

उभौ—[7]यदाज्ञापयति। कथय।

पुरुषः—[8]अहं जालोद्वालादिभिर्मत्स्यबन्धनोपायैः कुटुम्बभरणं करोमि।

श्यालः—(विहस्य) [9]विशुद्ध इदानीमाजीवः!

पुरुषः—[10]भर्नः, मा एवं भण।

सहजं किल यद्विनिन्दितं न खलु तत्कर्म विवर्जनीयम्।
पशुमारणकर्मदारुणोऽनुकम्पामृदुरेव श्रोत्रियः॥ १॥

---

1. अले कुम्भीलआ, कहेहि कहिं नुए एसे मणिबन्धणुक्किण्णणामहेए लाअकोआए अङ्गुलीआए समासादिए। 2. पसीदन्तो भावमिस्सो। ण हगे ईदिसकम्मकारी। 3. किं सोहणे बम्हणोत्ति कलिअ रण्णा पडिग्गहे दिण्णे? 4. सुणध दाणिं। हगे णक्कावदारलग्गन्तलवासी धीवले। 5. पाडच्चरा, किं अम्हेहिं जादा पुच्छिदा? 6. सूअअ, कहेदु शव्वं अनुक्कमेण। मा णं अन्तरा पडिबन्धह। 7. ज आवुत्ते आणवेदि। कहेहि। 8. अहके जालुग्गालादीहि मच्छबन्धणोवाएहि कुटुम्बभलणं कलेमि। 9. विसुद्धो दाणिं आजीवो। 10. भट्टा मा एवं भण।

शङ्के किल जं विणिन्दिए ण हु दे कम्म विवज्जणीअए।
पशमालणकम्मदालुणे अणुकम्पामिदु एव्व शोत्तिए॥

श्यालः—[1]ततस्ततः ?

पुरुषः—[2]एकस्मिन्दिवसे खण्डशो रोहितमत्स्यो मया कल्पितः यावत्तस्योदराभ्यन्तरे प्रेक्षे तावदिदं रत्नभासुरमङ्गुलीयकं दृष्टम् पश्चादहमस्य विक्रयाय दर्शयन्गृहीतो भावमिश्रैः । मारयत वा मुञ्चत वा । अयमस्यागमवृत्तान्तः ।

श्यालः—[3]जानुक, विस्मरन्ती गोत्रादौ मत्स्यबन्ध एव निःसंशयम् । अङ्गुलीयकदर्शनमस्य विमर्शयितव्यम् । राजकुलमेव गच्छामः ।

रक्षिणौ—[4]तथा । गच्छ, अरे ग्रन्थिभेदक । (सर्वे परिक्रामन्ति ।)

श्यालः—[5]सूचक इमं गोपुरद्वारेऽप्रमत्तौ प्रतिपालयतं यावदिदमङ्गुलीयकं यथागमनं भर्त्रे निवेद्य ततः शासनं प्रतीक्ष्य निष्क्रामामि

उभौ—[6]प्रविशत्वायुष्मान् स्वामिप्रसादाय । (निष्क्रान्तः श्यालः ।)

प्रथमः—[7]जानुक, चिरायते खल्वायुष्मान् !

द्वितीयः—[8]नन्वयमुपसर्पणीया राजानः !

प्रथमः—[9]जानुक, स्फुरतो मम हस्तावस्य वधस्य सुमनसः सिनद्धुम् (इति पुरुषं निर्दिशति ।)

पुरुषः—[10]नार्हति भावोऽकारणमारणो भवितुम् ।

---

1. तदो तदो ? 2. एक्कादिण दिअहे खण्डशो लोहिअमच्छे मए कप्पिदे । जावतरुण उदलब्भन्तरे पेक्खामि दाव एदं रदणभासुरं अङ्गुलीअअं देक्खअम् । पच्छा अहकं से विक्कआअ दंसअन्ते गहिदे भावमिस्सेहि । मालेह वा मुञ्चेह वा । अअं से आअमवुत्तन्ते । 3. जाणुअ, विम्मरन्ती गोत्तादौ मच्छबन्धो एव्व णिम्मंसअं । अङ्गुलीअअदंसण से विमरिसिदव्व । ता अहअ एव्व गच्छामो । 4. तह । गच्छ, अले गण्ठिभेदअ । 5. सूअअ, इमं गोपुरदुआरं अप्पमत्ता पडिवालेह जाव इम अङ्गुलीअअं जहागमणं भट्टिणो णिवेदिअ तदो सासणं पडिच्छिअ णिक्कमामि । 6. पविशदु आयुत्ते शामिपसादस्स । 7. जाणुआ, चिराअदि खु आयुत्ते ! 8. णं अवसरोवसप्पणीआ तहा इमस्स वहस्स सुमणा सिणद्धं । 10. ण अलुहदि

द्वितीयः—(विलोक्य) [1]एष नौ स्वामी पत्रहस्तो राजशासनं प्रतीक्ष्येतोमुखो दृश्यते । गृध्रबलिर्भविष्यसि शुनो मुखं वा द्रक्ष्यसि ।

(प्रविश्य) **श्यालः**—[2]सूचक, मुच्यतामेष जालोपजीवी । उपपन्नः वस्याङ्गुलीयस्यागमः ।

सूचकः—[3]यथावृत्तो भणति । एष यमसदनं प्रविश्य प्रतिनिवृत्तः !

इति पुरुषं परिमुक्तबन्धनं करोति ।)

पुरुषः—(श्यालं प्रणम्य) [4]भर्तः, त्वदीयं मे जीवितम् ।

श्यालः—[5]एष भर्त्राङ्गुलीयकमूल्यसंमितः प्रसादोऽपि दापितः ।

इति पुरुषाय स्वं प्रयच्छति ।)

पुरुषः—(सप्रणामं प्रतिगृह्य) [6]भर्तः, अनुगृहीतोऽस्मि ।

सूचकः—[7]एष नामानुग्रहो यच्छूलादवतार्य हस्तिस्कन्धे प्रतिष्ठापितः

जानुकः—[8]आवृत्त, पारितोषिकं कथयति तेनाङ्गुलीयकेन भर्तुः तेन भवितव्यमिति ।

श्यालः—[9]न तस्मिन्महार्हं रत्नं भर्तुर्बहुमतमिति तर्कयामि । तस्य नेन भर्त्राऽभिमतो जनः स्मृतः । मुहूर्तं प्रकृतिगम्भीरोऽपि पर्यश्रुनयन सीत् ।

अकालणमालणे भविदुं । 1. एदो अह्माण शामी पत्तहत्थे लाअशाशणं च्छिअ इदोमुहे देक्खीअदि । गिद्धबली भविस्सशि शुणो मुहं वा इशशि । 2. मुअअ, मुञ्चेदु एसो जालोअजीवी । उवणओ क्खु से अङ्गुलीअअस्स मो । 3. जह आवुत्ते भणादि । एशे जमशदण पाविशिअ पडिणिवुत्ते । 4. भट्टा तुह मे जीविदे । 5. एसो भट्टिणा अङ्गुलीअअमुलसम्मिदो पसादो वि दाविदो । भट्टा अणुग्गहिद म्हि । 7. एशे णाम अणुग्गहे जे शूलादो अवदालिअ हात्थिक्कन्धे ाबिदे । 8. आवुत्त, पारिदोसिअं कहेदि तेण अङ्गुलीअएण भट्टिणो शम्मदेण वं त्ति । 9. ण तम्मिं महारुहं रदणं भट्टिणो बहुमदं त्ति तक्केमि । तस्स दंसणेण

सूचकः—[1]सेवितं नामावुत्तेन !

जानुकः—[2]ननु भण । अय्य कृते मात्स्यिकमर्तुरिति । (इति पुरुषमसूयया पश्यति ।)

पुरुषः—[3]भट्टारक, इतोऽर्घं युष्माकं सुमनोमूल्यं भवतु ।

जानुकः—[4]एतावद्युज्यते ।

श्यालः—[5]धीवर, महत्तरस्त्वं प्रियवयस्यक इदानीं मे संवृत्तः । कादम्बरीमासिकमस्माकं प्रथमसौहृदमिष्यते । तच्छौण्डिकापणमेव गच्छामः । (इति निष्क्रान्ताः सर्वे)

प्रवेशकः

(ततः प्रविशत्याकाशयानेन सानुमती नामाप्सराः ।)

सानुमती—निर्वर्तितं मया पर्यायनिर्वर्तनीयमप्सरस्तीर्थमांनित्यं यावत्सानुजनय्याभिषेककाल इति सांप्रतमस्य राजर्षेरुदन्तं प्रत्यक्षीकरिष्यामि । येनकासंबन्धेन शरीरभूता मे शाकुन्तला । तया च दुहितृनिमित्तमादिष्टपूर्वास्मि । (समन्तादवलोक्य) किं नु खलु ऋतूत्सवेऽपि निरुत्सवारम्भमिव राजकुलं दृश्यते ? अस्ति मे विभवः प्रणिधानेन सर्वं परिज्ञातुम् । किं तु, सख्याः शाङ्गरवो मया मानयितव्यः ।

---

1. सेविदं णाम आवुत्तेण । 2. णणु भण । अय्य कए मच्छिअभत्तणो त्ति । 3. भट्टारक, इदो अद्धं तुह्मं सुमणोमुल्लं होदु । 4. एत्तके जुज्जइ । 5. धीवर, महत्तरो तुमं विअवअ॰ आअ दाणिं मे संवुत्तो । एदम्मि विवअ अङ्गाणं पढमसोहिदं इच्छीअदि । ता सोण्डिआवणं एव्व गच्छामो । 6. णिव्वत्तिदं मए पज्जाअणिव्वत्तणिज्जं अच्छरातित्थं । अज्ज वि माढुगोत्तस्स अभिसेअकालो त्ति संपदं इमस्स राएसिणो उदन्तं पच्चक्खीकरिस्सं । जेण आसंबन्धेण सरीरभूदा मे सउन्दला । ताए अ दुहिदुणिमित्तं आदिट्ठपुव्वम्हि । किं णु खु अदुच्छवे वि णिरुच्छवारम्भं विअ राअउलं दीसइ । अत्थि मे विहवो पणिधाणेण सव्वं परिण्णादुं । किं दु सहीए आदरो मए माणइदव्वो । होदु । इमाणं एव्व उज्जाणपालिआणं णिरक्खरिणीपडिच्छणआ

तु । अनयोरेवोद्यानपालिक्योर्मित्रस्करिणीप्रतिच्छन्ना पार्श्ववर्तिनी त्वोपलप्स्ये । (इति नाट्येनावतीर्य स्थिता ।)

(ततः प्रविशति चूताङ्कुरमवलोकयन्ती चेटी । अपरा च पृष्ठतस्तस्याः ।)

प्रथमा—[1]आताम्रहरितपाण्डुर जीवितसर्वं वसन्तमासस्य ।
दृष्टोऽसि चूतकोरक ऋतुमङ्गल त्वां प्रसादयामि ॥

द्वितीया—[2]परभृतिके, किमेकाकिनी मन्त्रयसे ?

प्रथमा—[3]मधुकरिके, चूतकलिकां दृष्ट्वोन्मत्ता परभृतिका भवति ।

द्वितीया—(सहर्षं त्वरयोपगम्य) [4]कथमुपस्थितो मधुमासः !

प्रथमा—[5]माधुकरिके, तवेदानीं काल एष मदविभ्रमगीतानाम् ।

द्वितीया—[6]सखि, अवलम्बस्व मां यावदग्रपादस्थिता भूत्वा चूतलिकां गृहीत्वा कामदेवार्चनं करोमि ।

प्रथमा—[7]यदि ममापि खल्वर्धमर्चनफलस्य ।

द्वितीया—[8]अकथितेऽप्येतत्संपद्यते यत एकमेव नौ जीवितं द्विधास्थितं शरीरम् । (सखीमवलम्ब्य स्थिता चूताङ्कुरं गृह्णाति) अये, अप्रतिरोऽपि चूतप्रसवोऽत्र चन्द्रमङ्गसुरभिर्भवति ! (इति कपोतहस्तकं कृत्वा)

त्वमसि मया चूताङ्कुर दत्तः कामाय गृहीतधनुषे ।
पथिकजनयुवतिलक्ष्यः पञ्चाभ्यधिकः शरो भव ॥३॥

1. आतम्महरिअपण्डुर जीविदसव्वं वसन्तमासस्स ।
दिट्ठो सि चूदकोरअ उदुमङ्गल तुमं पसाएमि ॥

2. परहुदिए किं एआइणी मन्तेसि ? 3. महुअरिए, चूदकलिअं देक्खिअ उम्मत्तिआ परहुदिआ होदि । 4. कहं उवट्ठिदो महुमासो । 5. महुअरिए, तव दाणिं एसो मदविब्भमगीदाणं । 6. सहि, अवलम्ब मं जाव अग्गपादट्ठिआ भविअ चूअलिअं गहिअ कामदेवच्चणं करेमि । 7. जइ मम वि खलु अद्धं अच्चणफलस्स । 8. अकहिदे वि एदं संपज्जइ जदो एक्कं एव्व णो जीविदं दुधाट्ठिदं सरीरं । अए [illegible] एसो बन्धणभङ्गसुरभी होदि ।

(इति चूताङ्कुरं क्षिपति। ततः प्रविशत्यपटीक्षेपेण कुपितः कञ्चुकी।)

कञ्चुकी—मा तावदनात्मज्ञे। देवेन प्रतिषिद्धे वसन्तोत्सवे त्वमाम्रकलिकाभङ्गं किमारभसे?

उभे—(भीते) [1]प्रसीदत्वार्यः। अगृहीतार्थे आवाम्।

कञ्चुकी—न किल श्रुतं युवाभ्यां यद्ग्रामन्तिकैस्तरुभिरपि देवस्य शासनं प्रमाणीकृतं तदाश्रयिभिः पत्रिभिश्च? तथा हि।

चूतानां चिरनिर्गतापि कलिका बध्नाति न स्वं रजः
संनद्धं यदपि स्थितं कुरबकं तत्कोरकावस्थया।
कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां रुतं
शङ्के संहरति स्मरोऽपि चकितस्तूणार्धकृष्टं शरम् ॥४॥

मानुमती—[2]नास्ति सन्देहः। महाप्रभावो राजर्षिः।

प्रथमा—'आर्य, कति दिवसान्यावयोर्मित्रावसुना राष्ट्रियेण भर्तुः पादमूलात् प्रेषितयोः। इत्थं च नौ प्रमदवनस्य पालनकर्म समर्पितम्। तदागन्तुकतयाऽश्रुतपूर्व आवाभ्यामेष वृत्तान्तः।

कञ्चुकी—भवतु। न पुनरेवं प्रवर्तितव्यम्।

उभे—'आर्य, कौतूहलं नौ। यद्यनेन जनेन श्रोतव्यं कथयत्वार्यः किंनिमित्तं भर्त्रा वसन्तोत्सवः प्रतिषिद्धः।

तुमं मए चूदङ्कुर [ति]णो कोमल त्ति अणुमण्णे।
पढिअ[म]णजुवइजणस्सवो पञ्चमहि ओ मारो होहि॥

1. पसीदद अज्जो। अग्गहीदत्थाओ अम्ह। 2. णत्थि संदेहो। महाप्पहावो राएसी! 3. अज्ज कदि[ि]वसाइं अम्हाणं मित्तावसुणा राट्ठिएण भट्टिणो पादमूलादो पेसिदाणं। इत्थं अ णो पमदवणस्स पालणकम्मं समप्पिदं। ता आअन्तुअत्ताए अस्सुदपु-

सानुमती—[1]'उन्मत्तप्रियाः खलु मनुष्याः ! गुरुणा कारणेन प्रवितर्क्यम् ।

कञ्चुकी—(स्वगतम्) बहुलीभूतमेतर्हि न कथ्यते ? (प्रकाशम्) किमत्रभवत्योः कर्णपथं नायातं शाकुन्तलाप्रत्यादेशकौलीनम् ?

उभे—[2]'श्रुतं राष्ट्रियमुखाद्यावदङ्गुलीयकदर्शनम् ।

कञ्चुकी—तेन ह्यत्र कर्यितव्यम् । यदेव खलु स्वाङ्गुलीयकदर्शनादनुस्मृतं देवेन 'सत्यमूढपूर्वा मे तत्रभवती गृहिणि शकुन्तला, किंतु प्रत्यादिष्टा' इति तदाप्रभृत्येव पश्चात्तापमुपगतो देवः । तथा हि ;

रम्यं द्वेष्टि यथा पुरा प्रकृतिभिर्न प्रत्यहं सेव्यते
शय्याप्रान्तविवर्तनैर्विगमयत्युन्निद्र एव क्षपाः
दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा
गोत्रेषु स्खलितस्तदा भवति च व्रीडाविलक्षश्चिरम् ॥५॥

सानुमती—[3]प्रियं मे ।

कञ्चुकी—अस्मात्प्रभवतो वैमनस्यादुत्सवः प्रत्याख्यातः ।

उभे—[4]युज्यते ।

(नेपथ्ये) [5]एतु एतु भवान् ।

कञ्चुकी—(कर्णं दत्त्वा) अये । इत एवाभिवर्तते देवः । स्वकर्माणि[6]यताम् ।

उभे—[6]तथा । (इति निष्क्रान्ते ।)

(ततः प्रविशति पश्चात्तापसदृशवेषो राजा विदूषकः प्रतीहारी च ।)

1. उम्मत्तपिआ खलु मणुस्सा । गुरुणा कारणेण होदव्वं । 2. सुदं रट्ठिअ-दो जाव अङ्गुलीअअदंसणं । 3. प्रिअं मे । 4. जुज्जदे । 5. एदु भवं । 6. तह ।

कञ्चुकी—(राजानमवलोक्य) अहो सर्वास्ववस्थासु रमणीयत्व-
माकृतिविशेषाणाम् ! एवमुत्सुकोऽपि प्रियदर्शनो देवः । तथा हि ।

प्रत्यादिष्टविशेषमण्डनविधिर्वामप्रकोष्ठार्पितं
बिभ्रत्काञ्चनमेकमेव वलयं श्वासोपरक्ताधरः ।
चिन्ताजागरणप्रतान्तनयनस्तेजोगुणादात्मनः
संस्कारोल्लिखितो महामणिरिव क्षीणोऽपि नालक्ष्यते ॥६॥

सानुमती—(राजानं दृष्ट्वा) [1]स्थाने खलु प्रत्यादेशविमानिताप्यस्य
कृते शकुन्तला क्लाम्यति !

राजा—(ध्यानमन्दं परिक्रम्य)

प्रथमं सारङ्गाक्ष्या प्रियया प्रतिबोध्यमानमपि सुप्तम्
अनुशयदुःखायेदं हतहृदयं संप्रति विबुद्धम् ॥७॥

सानुमती—[2]नन्वीदृशानि नाम्नि तस्या भागधेयानि !

विदूषकः—(स्वगतम्) [3]लङ्घित एष भूयोऽपि शाकुन्तलाव्याधिना
न जाने कथं चिकित्सितव्यो भविष्यतीति !

कञ्चुकी—(उपगम्य) जयतु जयतु देवः । महाराज, प्रत्यवेक्षिता
प्रमदवनभूमयः । यथाकाममध्यास्तां विनोदस्थानानि महाराजः ।

राजा—वेत्रवति, मद्वचनादमात्यमार्यपिशुनं ब्रूहि । चिरप्रबोधान्न
संभावितमस्माभिरद्य धर्मासनमध्यासितुम् । यत्प्रत्यवेक्षितं पौरकार्यं
मार्येण तत्पत्रमारोप्य दीयतामिति ।

प्रतीहारी—[4]यदेव आज्ञापयति । (इति निष्क्रान्ता ।)

---

1. ठाणे क्खु पच्चादेसविमाणिदा वि इमस्स किदे सउन्दला किलम्मदि ! 2. ण
3. लङ्घितो एसो भूओ वि सउन्दलावाहिणा ।

राजा—वातायन, त्वमपि स्वं नियोगमशून्यं कुरु ।

कञ्चुकी—यदाज्ञापयति देव : । (इति निष्क्रान्तः)

विदूषकः—[1]कृतं भवता निर्मक्षिकम् । सांप्रतं शिशिरातपच्छेद-क्षमणीयेऽस्मिन्प्रमदवनोद्देश आत्मानं रमयिष्यसि ।

राजा—वयस्य, यदुच्यते रन्ध्रोपनिपातिनोऽनर्था इति तदस्यभि-रि वचः । कुतः ।

निसुताप्रणयस्मृतिरोधिना मम च मुक्तमिदं तमसा मनः ।
सिजेन सखे प्रहरिष्यता धनुषि चूतशरश्च निवेशितः ॥८॥

विदूषकः— तिष्ठ तावत् । अनेन दण्डकाष्ठेन कन्दर्पबाणं नाश-यिष्यामि । (इति दण्डकाष्ठमुद्यम्य चूताङ्कुरं पातयितुमिच्छति ।)

राजा—(सस्मितम् ।) भवतु । दृष्टं ब्रह्मवर्चसम् । सखे, कोपविष्टः प्रियायाः किंचिदनुकारिणीषु लतासु दृष्टिं विलोभयामि ?

विदूषकः—[2]नन्वामन्त्रपरिचारिका चतुरिका भवता संदिष्टा । [3]माधवीमण्डप इमां वेलामतिवाहयिष्ये । तत्र मे चित्रफलकगतां स्वहस्तलिखितां तत्रभवत्याः शकुन्तलायाः प्रतिकृतिमानये'ति ।

राजा—ईदृशं हृदयविनोदनस्थानम् ! तत्तमेव मार्गमादेशय ।

विदूषकः—[4]इत इतो भवान् ।

(उभौ परिक्रामतः । सानुमत्यनुगच्छति ।)

विदूषकः—[5]एष मणिशिलापट्टकसनाथो माधवीमण्डप उपहार-

---

1. किद भवदा णिम्मच्छिअं । अवदं सिसिरादवच्छेअरमणीए इम्मस्मिं उववणुद्देसे अत्ताणं रमइस्सामि । 2. चिट्ठ दाव । इमिणा दण्डकट्ठेण कन्दप्पबाणं णासइस्सं । ... ण आसण्णपरिआरिआ चदुरिआ भवदा संदिट्ठा । माहवामण्डवे इमं वेलं अदिवा-हेस्सं । ताहि मे चित्तफलअगदं महत्थलिहिदं तत्तहोदीए सउन्दलाए पडिकिदिं आणेहि त्ति । 4. इदो इदो भवं । 5. एसो मणिसिलापट्टअसणाहो माहवीमण्डवो उवहार-

रमणीयतया निःसंशयं स्वागतेनेव नौ प्रतीच्छति। तत्प्रविश्य निषीदतु भवान्। (उभौ प्रवेशं कृत्वोपविष्टौ।)

सानुमती—[1]लतासंश्रिता द्रक्ष्यामि तावत्सख्याः प्रतिकृतिम् तत्तस्यै भर्तुर्बहुमुखमनुरागं निवेदयिष्यामि। (इति तथा कृत्वा स्थिता।)

राजा—सखे, सर्वमिदानीं स्मरामि शकुन्तलायाः प्रथमवृत्तान्तम्। कथितवानस्मि भवते च। स भवान्प्रत्यादेशवेलायां मत्समीपगतो नामीत्। पूर्वमपि न त्वया कदाचित्संकीर्तितं तत्रभवत्या नाम कञ्चिदहमिव विस्मृतवानपि त्वम्?

विदूषकः—[2]न विस्मरामि। किं तु सर्वं कथयित्वावसाने पुनस्त्वया 'परिहासविजल्पित एव न भूतार्थ' इत्याख्यातम्। मयापि मृत्पिण्डबुद्धिना तथैव गृहीतम्। अथ वा भवितव्यता खलु बलवती!

सानुमती—[3]एवं न्विदम्।

राजा—(ध्यात्वा) सखे, त्रायस्व माम्!

विदूषकः—[4]भोः किमेतत्? अनुपपन्नं खल्वीदृशं त्वयि। कदापि सत्पुरुषाः शोकव्यास्तव्या न भवन्ति। ननु प्रवातेऽपि निष्कम्पा गिरयः!

राजा—वयस्य, निराकरणविक्लवायाः प्रियायाः समवस्थामनुस्मृत्य बलवदशरणोऽस्मि। सा हि,

---

रमणिज्जदाए णिम्मंसअ सआदेण विअ णो पडिच्छदि। ता पविसिअ णिसीददु भवं।

1. लदासम्मिदा दाक्खिण्णस्स दाव सहीए पडिकिदि। तदो से भत्तणो बहुमुहं अणुरायं णिवेदइस्सं। 2. ण विसुमरामि। किं तु सव्वं कहिअ अवसाणे उण 'तुए परिहासविजम्पिदं एसो ण भूदत्थो'त्ति आचक्खिदं। मए वि मिप्पिण्डबुद्धिणा तह एव्व गहीदं। अहवा भवितव्वदा क्खु बलवदी। 3. एवं णेदं। 4. भो किमेदं? अणुववण्णं क्खु

इतः प्रत्यादेशात्स्वजनमनुगन्तुं व्यवसिता
स्थिता तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे।
पुनर्दृष्टिं बाष्पप्रसरकलुषामर्पितवती
मयि क्रूरे यत्तत्सविषमिव शल्यं दहति माम् ॥९॥

मानुमती—[1]अहो! ईदृशी स्वकार्यपरतान्य मामपि संतापयति।

विदूषकः—[2]अस्ति मे तर्कः केनापि तत्रभवत्याकाशचारिणा नीतेति

राजा—कः पतिदेवतामन्यः परामर्ष्टुमुत्सहेत? मेनका किल सख्यास्ते जन्मप्रतिष्ठेति श्रुतवानस्मि। तत्सहचारिणीभिः सखी ते हृतेति मे हृदयमाशङ्कते।

मानुमती—[3]संमोहः खलु विस्मयनीयो न प्रतिबोधः!

विदूषकः—[4]यद्येवम्, अस्ति खलु समागमः कालेन तत्रभवत्या।

राजा—कथमिव?

विदूषकः—[5]न खलु मातापितरौ भर्तृवियोगदुःखितां दुहितरं चिरं द्रष्टुं पारयतः।

राजा—वयस्य,

स्वप्नो नु माया नु मतिभ्रमो नु
क्लिष्टं नु तावत्फलमेव पुण्यम्।
असंनिवृत्त्यै तदतीतमेते
मनोरथा नाम तटप्रपाताः ॥१०॥

1. अम्महे! ईदिमा मव ज्जपरदा। इमस्स मदावेण अहं रमामि। 2. अत्थि मक्को केण वि तत्तहोदी आआमचारिणा णीदे त्ति। 3. समोहो क्खु विह्मअणिज्जो पडिवोहो। 4. जइ एव्व अत्थि क्खु समाअमो कालेण तत्तहोदीए। 5. ण क्खु मादापिदरा भत्तविवोअदुक्खिअं दुहिदरं चिरं देक्खिदुं पारेन्ति।

विदूषकः—[1]'मैवम् । नन्वङ्गुलीयकमेव निदर्शनमवश्यंभाव्य-चिन्तनीयः समागमो भवतीति ।

राजा—(अङ्गुलीयकं विलोक्य) अये, इदं तावदसुलभस्थानभ्रंशि शोचनीयम् !

तव सुचरितमङ्गुलीय नूनं प्रतनु ममेव विभाव्यते फलेन ।
अरुणनखमनोहरासु तस्याश्चुतमसि लब्धपदं यदङ्गुलीषु ॥११॥

सानुमती—[2]'यद्यन्यहस्तगतं भवेन्मत्यमेव शोचनीयं भवेत् ।

विदूषकः—[3]'भोः, इयं नाममुद्रा केनोद्घातेन तत्रभवत्या हस्ता-ध्यासं प्रापिता ?

सानुमती—[4]'ममापि कौतूहलेनाकारित एषः ।

राजा—श्रूयताम् । तपोवनान्तरगमनाय प्रस्थितं मां प्रिय सवाष्पमाह 'कियच्चिरेणार्यपुत्रः प्रतिपत्तिं दास्यति?' इति ।

विदूषकः—[5]'ततस्ततः ?

राजा—पश्चादिमां मुद्रां तदङ्गुलौ निवेशयता मया प्रत्यभिहिता।

एकैकमत्र दिवसे दिवसे मदीयं
नामाक्षरं गणय गच्छसि यावदन्तम् ।
तावत्प्रिये मदवरोधगृहप्रवेशं
नेता जनस्तव समीपमुपैष्यतीति ॥१२॥

तच्च दाक्षिण्यात्मना मया मोहान्नानुष्ठितम् ।

सानुमती—[6]'रमणीयः खल्ववधिर्विधिना विसंवादितः ।

---

1. मा एव्वं । ण अङ्गुलीअअं एव्व णिदंसणं अवस्संभाव्वी अचिन्तणीओ समागमो होदि त्ति । 2. जइ अण्णहत्थगदं भवे, सच्चं एव्व सोअणिज्जं भवे । 3. भो, इअं णाममुद्दा केण उग्घादेण तत्तहोदीए हत्थाब्भासं पाविदा? 4. मम वि कोदूहलेण

विदूषकः—'अथ कथं धीवरकल्पितस्य रोहितमत्स्यस्योदराभ्यन्तर आसीत् ?

राजा—शचीतीर्थं वन्दमानायाः सम्भ्रमाद्धस्तादङ्गुलीयकं स्रोतसि विस्रष्टम् ।

विदूषकः—'युज्यते ।

मानुमती—'अत एव तपस्विन्याः शकुन्तलाया अधर्मभीरोरस्य नर्पेः परिणये संदेह आसीत् । अथ वेदृशोऽनुरागोऽभिज्ञानमपेक्षते; —कथमिवैतत् ?

राजा—उपालप्स्ये तावदिदमङ्गुलीयकम् ।

विदूषकः—(आत्मगतम्) 'गृहीतोऽनेन पन्था उन्मत्तानाम् ।

राजा—कथं नु तं बन्धुरकोमलाङ्गुलिं
करं विहायासि निमग्नमम्भसि ?

अथ वा ।

अचेतनं नाम गुणं न लक्षये-
न्मयैव कस्मादवधीरिता प्रिया ॥१३॥

विदूषकः—(आत्मगतम्) 'कथं बुभुक्षया खादितव्योऽस्मि !

राजा—प्रिये, अकारणपरित्यागानुशयतप्तहृदयस्तावदनुकम्प्यतां जनः पुनर्दर्शनेन ।

(ततः प्रविशत्यपटीक्षेपेण चित्रफलकहस्ता चतुरिका)

---

1. अध कहं धीवलकप्पिअस्स लोहिअमच्छस्स उदलब्भन्तले आसि । 3. अहो एव्व तवस्सिणीए सउन्दलाए अधम्मभीरुणो इमस्स णिणो परिणए संदेहो आसि । अहवा ईदिसो अणुराओ अहिण्णाणं अवेक्खदि; कहं [illegible] 5. कहं बभक्खाए खादिदव्वो म्हि !

चतुरिका— 'इयं चित्रगता भट्टिनी। (इति चित्रफलकं दर्शयति।)

विदूषकः—(विलोक्य) 'साधु, वयस्य । मधुरावस्थानदर्शनीयो भावानुप्रवेशः । स्खलनीव मे दृष्टिर्निम्नोन्नतप्रदेशेषु ।

सानुमती—'अहो राजर्षेर्निपुणता ! जाने मय्यग्रतो मे वर्तत इति।

राजा—यद्यत्साधु न चित्रे स्यात्क्रियते तत्तदन्यथा ।
तथापि तस्या लावण्यं रेखया किंचिदन्वितम् ॥१४॥

सानुमती—'महाराजेनैतत्प्रथमं गुरोः स्नेहप्रयानवज्ञेपस्य च

विदूषकः—'भोः ! इदानीं निस्त्रप्तत्रभवत्यो दृश्यन्ते । सर्वाश्च दर्शनीयाः । कतमाऽत्र तत्रभवती शकुन्तला ?

सानुमती—'अनभिज्ञः खल्वीदृशस्य रूपस्य मोघदृष्टिरयं जनः

राजा—स्वं तावत्कतमां तर्कयसि ?

विदूषकः—'तर्कयामि यैषा शिथिलबन्धनोद्गतकुसुमेन केशान्तेनोद्भिन्नस्वेदबिन्दुना वदनेन विशेषतोऽपभृताभ्यां बाहुभ्यामवसेकस्निग्धतरुणाम्रपल्लवस्य चूतपादपस्य पार्श्वं ईषत्परिश्रान्तेवालिखिता, सा शकुन्तला; इतरे सख्याविति ।

राजा—निपुणो भवान् । अन्यत्र मे भावविघ्नम् ।

---

1. इअ चित्तगदा भट्टिणी। 2. साधु, वअस्स ! मधुरावत्थाणदंसणिज्जो भावाणुप्पवेसो। खलदि विअ मे दिट्ठी णिण्णुण्णअप्पदेसेसु। 3. अम्भो, राएसिणो णिउणदा। जाणे मदो अग्गदो मे वट्टदि त्ति। 4. अहिअं एदं पच्चादावगमणो मिगेणअणवलेवस्स अ। 5. भो दाणिं णिण्णा तत्तहोदी भो दीसन्ति। सव्वाओ अ दंसणीआओ। कदमा एत्थ तत्तहोदी सउन्तला ? 6. अणभिण्णो क्खु दीहसस्स रूवस्स। मोघदिट्ठी अअं जणो। 7. तक्केमि आएण णिद्दअबन्धणुव्वन्तकुसुमेण केसन्तेण उद्भिण्णसेअ-[illegible] विसेसदो ओआर आहि बाहाहि अवसेआसण्णिदचूअपल्लवस्स चूअ- [illegible]

खिन्नाङ्गुलिविनिवेशो रेखाप्रान्तेषु दृश्यते मलिनः ।
अश्रु च कपोलपतितं दृश्यमिदं वर्तिकोच्छ्वासात् ॥१५॥

तुरिके, अर्धलिखितमेतद्विनोदस्थानम् । गच्छ । वर्तिकां तावदानय ।

चतुरिका—[1] आर्यमानय, अवलम्बन्तां चित्रफलकं यावदागच्छामि

राजा—अहमेवैतदवलम्बे । (यथोक्तं करोति ।) (निष्क्रान्ता चेटी ।)

राजा—(निःश्वस्य,)

साक्षात्प्रियामुपगतामपहाय पूर्वं
चित्रार्पितामहमिमां बहुमन्यमानः ।
स्रोतोवहां पथि निकामजलामतीत्य
जातः सखे प्रणयवान्मृगतृष्णिकायाम् ॥१६॥

विदूषकः—(आत्मगतम्) [2]एषोऽत्रभवान्हंसमिथुनकमुज्झ्य मृगतृष्णिकां गतः । भो, अपरं किमत्र लिखितव्यम् ?

सानुमती—[3]यो यः प्रदेशः सख्या मेऽभिरूपस्तं तमालेखितुमिच्छामि भवेत् ।

राजा—श्रूयताम् ।

कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी
पादास्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः ।
शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः
शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम् ॥१७॥

---

1. अज्ज माढव्व, अवलम्बह चित्तफलअं जाव आअच्छामि । 2 एसो अत्तभवं अदिक्कामअ मिआणीण्हआ मंतेदो । भो, अवरं किं एत्थ लिहिदव्वं ? 3 जो पदेसो सहीए मे अहिरूवो तं तं आलिहिदुकामो भवे ।

विदूषकः—(आत्मगतम्) [1]यथाहं पश्यामि पूरितव्यमनेन चित्र-फलकं लम्बकूर्चानां तापसानां कदम्बैः।

राजा—वयस्य अन्यच्च। शाकुन्तलायाः प्रसाधनमभिप्रेतमत्र विस्मृतमस्माभिः।

विदूषकः—[2]किमिव?

सानुमती—[3]वनवासस्य सौकुमार्यस्य विनयस्य च यत्सहगं भविष्यति।

राजा—

कृतं न कर्णार्पितबन्धनं सखे शिरीषमागण्डविलम्बि केसरम्
न वा शरच्चन्द्रमरीचिकोमलं मृणालसूत्रं रचितं स्तनान्तरे ॥१८॥

विदूषकः—[4]भोः, किं नु तत्रभवती रक्तकुवलयपल्लवशोभिनाग्र-हस्तेन मुखमावार्य चकितचकितेव स्थिता? (सावधानं निरूप्य दृष्ट्वा) एष दास्याःपुत्रः कुसुमरसपाटच्चरस्तत्रभवत्या वदनकमलमभिलङ्घते मधुकरः।

राजा—ननु वार्यतामेष धृष्टः!

विदूषकः—[5]भवानेवाविनीतानां शासितास्य वारणे प्रभविष्यति

राजा—युज्यते। अयि भोः कुसुमलताप्रियातिथे, किमत्र परि-पतनखेदमनुभवसि?

एषा कुसुमनिषण्णा तृषितापि सती भवन्तमनुरक्ता।
प्रतिपालयति मधुकरी न खलु मधु विना त्वया पिबति ॥१९॥

---

1. जह अहं पेक्खामि पूरिदव्वं णेण चित्तफलअं लम्बकुच्चाणं तावसाणं क-म्बेहि। 2. किं विअ? 3. वणवासस्स सोउमारस्स विणअस्स अ जं सरिसं भविस्सदि। 4. भो, किं णु तत्तहोदी रत्तकुवलअपल्लवसोहिणा अग्गहत्थेण मुहं आवारिअ चइदचे-इव्व ठिआ। एसो दासीपुत्तो कुसुमरसपाडच्चरो तत्तहोदीए वअणकमलं अभि-

सानुमती—[1]अद्याभिज्ञानं खल्वेष वारितः ।

विदूषकः—[2]प्रतिषिद्धापि नामैषा जातिः ।

राजा—एवं भो न मे शासने तिष्ठसि ? श्रूयतां तर्हि संप्रति—

अक्लिष्टबालनवपल्लवलोभनीयं
पीतं मया मदयमेव ननोत्मवेषु ।
बिम्बाधरं स्पृशसि चेद्भ्रमर प्रियाया-
स्त्वां कारयामि कमलोदरबन्धनस्थम् ॥ २० ॥

विदूषकः—[3]एवं तीक्ष्णदण्डस्य किं न भेष्यति ? (प्रहस्य । आत्मगतम् ।) एष तावदुन्मत्तः । अहमप्येतस्य सङ्गेनेदृशवर्ण इव संवृत्तः । (प्रकाशम्) भोः चित्रं खल्वेतत् !

राजा—कथं चित्रम् ?

सानुमती—[4]अहमपीदानीमवगतार्या । किं पुनर्यथालिखिता-
नुभाव्येषः !

राजा—वयस्य, किमिदमनुष्ठितं पौरोभाग्यम् !

दर्शनसुखमनुभवतः साक्षादिव तन्मयेन हृदयेन ।
स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कान्ता ॥२१॥

(इति बाष्पं विहरति ।)

सानुमती—[5]पूर्वापरविरोध्यपूर्व एष विरहमार्गः !

राजा—वयस्य, कथमेवमविश्रान्तदुःखमनुभवामि !

---

1. अज्ज अंगुलीदं खु एत्तो वारिदा । 2. पडिसिद्धा वि वामा एसा जादी । 3. एव्व तिक्खणदण्डस्स किं ण भाइस्सदि । एसो दाव उम्मत्तो । अहं पि एदस्स संगेण ईदिसवण्णो विअ संवुत्तो । भो चित्तं खु एदं । 4. अहं पि दाणिं अवगदत्था । किं उण अहलिहिदाणुभवा एसा । 5. पुव्वावरविरोही अपुव्वो एसो विरहमग्गो ।

प्रजागरात्खलीभूतस्तस्याः स्वप्ने समागमः ।
बाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि ॥२२॥

सानुमती—[1]सर्वथा प्रमार्जितं त्वया प्रत्यादेशदुःखं शाकुन्तलायाः।

(प्रविश्य) **चतुरिका**—[2]जयतु जयतु भर्ता । वर्तिकाकरण्डकं गृहित्वैतोमुखं प्रस्थितास्मि ।

राजा—किं च ?

चतुरिका—[3]य मे हस्तादन्तरा वर्तिकाकरण्डकं गृहीत्वा मुखव्याहरणायावस्थापनेष्यामीति मत्प्रत्यादेशं गृहीतः ।

विदूषकः—[4]दिष्ट्या त्वं मुक्तो !

चतुरिका—[5]यावद्देव्या विज्ञापनायं वर्तिकाकरण्डकं मोचयामि तावन्मयैवात्र भवितव्यम् ।

राजा—वयस्य, उपस्थिता देवी बहुमानपूर्विका च । मयापि प्रतिकृतिरर्पयितुं ।

विदूषकः—[6]साधु स्मारितोऽस्मि । चित्रफलकमादायोत्थातव्यं च । यावदन्तःपुरकृत्यं गुरवो मां मेघप्रतिच्छन्दे प्रतीक्षन्ते शब्दापय । (इति द्रुतपदं निष्क्रान्तः ।)

सानुमती—अनन्यपरिजनोऽपि प्रथमापराधे सखीजनः । किं पुनरियं शिष्टसौहार्दहृदयेषु ।

1. ए. ए. पर्वतीय [illegible] 2. [illegible] 3. [illegible] 4. [illegible] 5. [illegible] 6. [illegible] 7. [illegible]

(प्रविश्य पत्रहस्ता) **प्रतीहारी**—[1]जयतु जयतु देवः !

राजा—वेत्रवति, न खल्वन्तरा दृष्टा त्वया देवी ?

प्रतीहारी—[2]अथ किम् । पत्रहस्तां मां प्रेष्य प्रतिनिवृत्ता ।

राजा—कार्यज्ञा कार्यविरोधं मे परिहरति ।

प्रतीहारी—[3]देव, अमात्यो विज्ञापयति । अर्थजातस्य गणनाबहु-त्वमेकमेव पौरकार्यमवेक्षितं; तद्देवः पत्रारूढं प्रत्यक्षीकरोत्विति ।

राजा—इतः पत्रं दर्शय । (प्रतिहार्युपनयति ।)

राजा—(अनुवाच्य) कथम् ! समुद्रव्यवहारी सार्थवाहो धनपित्रो नाम नौव्यसने विपन्नः । अनपत्यश्च किल तपस्वी ! राजगामी प्रत्यर्थमेतच्च इत्येतदमात्येन लिखितम् । कष्टं खल्वनपत्यता ! वेत्रवति, बहुधनत्वाद्बहुपत्नीकेन तत्रभवता भवितव्यम् । विचार्यतां यदि गर्भिणी तस्य भार्या स्यात् ।

प्रतीहारी—[4]देव, इदानीमेव सार्थिकस्य श्रेष्ठिनो दुहिता निर्वृत्त-पुंसवना जायाया श्रूयते ।

राजा—ननु गर्भः पित्र्यं रिक्थमर्हति ! गच्छ । एतमर्थं ब्रूहि ।

प्रतीहारी—[5]यदेव आज्ञापयति । (इति प्रस्थिता ।)

राजा—एहि तावत् !

प्रतीहारी—[6]इयमस्मि ।

राजा—किमनेन संततिरस्ति नास्तीति ?

---

1. जदु देवो । 2. अह दे । पत्तहत्थं मं देक्खिअ पडिणिउत्ता । 3. देव अमच्चो विण्णवेदि । अज्जाइदस्स गणणाबहुत्तणए एक्क एव्व पोरकज्जं अवेक्खिदं; तं देवो पत्तारूढं पच्चक्खीकरेदु त्ति । 4. देव दाणिं एव्व सत्थवाहस्स सेट्ठिणो दुहिआ [illegible] । 5. जं देवो आणवेदि । 6. इअं अहि ।

येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना ।
स स पापादृते तासां दुष्यन्त इति घुष्यताम् ॥२३॥

प्रतीहारी —'एवं नाम घोषयितव्यम् । (निष्क्रम्य, पुनः प्रविश्य काले प्रवृष्टमिवाभिनन्दितं देवस्य शासनम् ।

राजा—(दीर्घमुष्णं च निःश्वस्य) एवं भोः ! मंतनिच्छेदनिरवलम्बानां कुलानां मूलपुरुषावमानं संपदः परमपवित्रन्ति । ममाप्यन्ते पूरुवंशश्रिय एष एव वृत्तान्तः !

प्रतीहारी— प्रतिहतमप्रकाशम् ।

राजा—धिङ् मामुपस्थितश्रेयोवमानिनम् !

मानुमती—'अभंशयं सर्वमेव हृदये कृत्वा निन्दितोऽनेनात्मा।

राजा-

संरोपितऽप्यात्मनि धर्मपत्नीं त्यक्ता मया नाम कुलप्रतिष्ठा
कल्प्यिष्यमाणा महते फलाय वसुंधरा काल इवोप्तबीजा । २४॥

मानुमती —'अपरिच्छिन्नदानीं ते संततिर्भविष्यति ।

चतुरिका—(जनान्तिकम्) अयि, अनेन सार्थवाहवृत्तान्तेन [illegible] मनो । एनमाश्वासयितुं मनश्चिन्तादायं साधुकं गृहीतावल्ल

प्रतीहारी —'मृष्टं भणसि । (इति निष्क्रान्ता ।)

राजा- -अहो, दुष्यन्तस्य संशयमारूढाः पिण्डभाजः । कुतो

1. एष्य नाम [illegible] । [illegible] 2 परिहृतं अप्रकाशम् । 3. अभंशयं मां [illegible] 4. अपरिच्छिन्नाः [illegible] । 5. [illegible]

अस्मात्परं बत यथाश्रुति संभृतानि
को नः कुले निवपनानि नियच्छतीति ।
नूनं प्रसूतिविकलेन मया प्रसिक्तं
धौताश्रुशेषमुदकं पितरः पिबन्ति ॥२५॥

इति मोहमुपगतः ।)

चतुरिका–(सभ्रममवलोक्य) 'सखि माधविके सखि माधविके भणं ।

मानुमती–'हा धिक् ! हा धिक् ! मति खलु दीर्घव्यवधानदोषेणैवोऽन्धकारदोषमनुभवति । अहमिदानीमेव निर्वृतं करोमि ? अथ वा, श्रुतं मया शकुन्तलां समाश्वासयन्त्या मदिन्द्रजनन्या मुखाग्रजभागोत्सुका देवा एव तथानुष्ठास्यन्ति यथोचितेन धर्मपत्नीं मनोभिनन्दिष्यतीति । तद्युक्तमेतं कालं प्रतिपालयितुम् । यावदनेन वृत्तान्तेन प्रियसखीं समाश्वासयामि । (इत्युक्त्वान्तरेण निष्क्रान्ता)

(नेपथ्ये ।) अन्तहणअ !

राजा–(प्रत्यागतः । हर्षं दत्त्वा) अये माधवगम्येवार्तस्वरः । कः कोऽत्र भोः ?

(प्रविश्य) **प्रतीहारी**–(सभ्रमम्) 'परित्रायतां देवः संशयगतो वयस्यम् ।

राजा—केनात्तगन्धो मातलिः ?

सभ्रमादवलोक्य । सखि माधविके सखि माधविके भणं । 2. अन्धकार । सखि मधुकरि सखि वसुधाणएसा अन्धआरदोसमणुहवदि । अहं दाणिं एव्व णिव्वुदं करेमि । अहवा सुदं मइन्दजणणीए मघवदो पणामाहिरुआ देवा एव्व तधाणुट्ठिस्सन्ति जधुचिदट्ठम्मपत्तिणिं मघवा अहिणन्दिस्सदि त्ति । ता जुत्तं दाव पडिपालइदुं । जाव इमिणा वुत्तन्तेण पिअसहिं समस्सासेमि । 3. अच्चहणणम् ।

प्रतीहारी—[1]अदृष्टरूपेण केनापि मत्तेनातिक्रम्य मेघप्रतिच्छन्द-
प्रासादव्याग्रभूमिमारोपितः ।

राजा—(उत्थाय) मा नाम । ममापि मत्तैरभिभूयन्ते गृहा
अथ वा ।

अहन्यहन्यात्मन एव नावज्ञातुं प्रमादस्खलितं न शक्यम्
प्रजासु कः केन पथा प्रयातीत्यशेषतो वेदितुमस्ति शक्तिः ॥२६॥

(नेपथ्ये)[1]भो वयस्य, अविहा ! अविहा !

राजा—(सनिर्भेदम् परिक्रामन्) सखे, न भेतव्यम् ।

(नेपथ्ये) (पुनस्त्वरया पठित्वा)[1] अयं न भेतव्यामि ! एष मां कं
प्रत्यवननशिरोवर्गमिक्षुमिव क्षिपति !

राजा—(सदृष्टिक्षेपम्) अयमस्मि ।

(प्रविश्य शार्ङ्गहस्तः) **यवनी**—भोः कष्टम् । अपराह्णे मृगयानि-

(राजा सबाणं धनुरादत्ते)

(नेपथ्ये) **एष त्वामभिनवकण्ठशोणितार्थी**
शार्दूलः पशुमिव हन्मि चेष्टमानम् ।
आर्तानां भयमपनेतुमानवन्त्वा
दुष्यन्तस्त्वय शरणं भवत्विदानीम् ॥२७॥

राजा—(सरोषम्) कथं मामेवोद्दिश्यति ! तिष्ठ, तिष्ठ कृतान्ता-
त्वमिदानीं न मोक्ष्यसि । (शार्ङ्गमारोप्य) पश्यसि, मोघानमोघमार्ग-

1. अदृष्टरूपेण केनापि मत्तेनातिक्रम्य मेघप्रतिच्छन्द[illegible]
[illegible]

प्रतीहारी—[1]इत इतो देवः । (सर्वे सत्वरमुपसर्पन्ति ।)

राजा—(समन्ताद्विलोक्य) शून्यं खल्विदम् !

(नेपथ्ये) [2]अविहा ! अविहा ! अहमत्रभवन्तं पश्यामि । त्वं मां पश्यसि ! विडालगृहीतो मूषक इव निराशोऽस्मि जीविते संवृत्तः !

राजा—सौम्यिरक्षितिलिङ्गिन् ! मदीयमन्त्रं त्वां द्रक्ष्यति । एष किमपि संदधे,

यो हनिष्यति निष्पापं त्वां रक्ष्यं रक्षिष्यति द्विजम् ।
हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः ॥ २८ ॥

इत्यस्त्रं संधत्ते ।) (नेपथ्यात् प्रादुर्भवति विदूषकमुन्मृज्य मातलिः, विदूषकश्च ।)

मातलिः—कृताः शरण्यं हरिणा तवासुराः
शरासनं तेषु विकृष्यतामिदम् ।
प्रमादमौग्ध्यानि सतां सुहृज्जने
पतन्ति चक्षूंषि न दारुणाः शराः ॥२९॥

राजा—(सभ्रमम्) अयमुपसंहृतास्त्रः स्वयमेव, मातलिः । स्वागतं महेन्द्रस्य ।

विदूषकः—[3]अहं येनाहुताशनसाक्षिको मातलिः सोऽनेन स्वागतेनाभिहितः ।

मातलिः—(सस्मितम्) आयुष्मन्, श्रूयतां यदर्थमाज्ञप्तो हरिणा प्रेषितः ।

राजा—अवहितोऽस्मि ।

1. इत इतो देवः । 2. अविहा ! अविहा ! अहमत्रभवन्तं पश्यामि । त्वं मां पश्यसि ! विडालगृहीतो मूषक इव निराशोऽस्मि जीविते संवृत्तः । 3. अहं येनाहुताशनसाक्षिको मातलिः सोऽनेन स्वागतेनाभिहितः ।

मातलिः—अस्ति कालनेमिप्रसूतिर्दुर्जयो नाम दानवगणः ।

राजा—अस्ति । श्रुतपूर्वं मया नारदात् ।

मातलिः— मरुद्युस्ते म क्किल शतक्रतोरज्य-
स्तस्य त्वं रणशिरसि स्मृतो निहन्ता ।
उच्छेत्तुं प्रभवति यन्न समग्रमि-
स्तन्नैशं तिमिरमपाकरोति चन्द्रः ॥३०॥

म भवानात्तशस्त्र एव इदानीमैन्द्रयमाह्व विनयाय प्रतिष्ठताम् ।

राजा—अनुगृहीतोऽहमनया मघवतः संभावनया । अथ मातलिं प्रति भवता किमेवं प्रयुक्तम् ?

मातलिः—यदि कथ्यते । किंचिन्निमित्तादपि मनःसंतापाद् युष्मान्मया विक्लवो दृष्टः । पश्चान्कोपयितुमायुष्मन्तं तया कृतवानस्मि । कुतः ।

ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणां कुरुते ।
प्रायः स्वं महिमानं क्षोभान्नातिपद्यते जन्तुः ॥३१॥

राजा—(जनान्तिकम्) भवतु, अनात्मकर्मणीयं दिव्य-पतगजे तत्र परिगतार्थं कृत्वा मद्वचनादमात्यगुणं ब्रूहि ।

त्वन्मतिः केवलां तावत्पितरिव पालयतु प्रजाः ।
अधिज्यमिदमन्यस्मिन्कर्मणि व्यापृतं धनुः ॥३२॥

विदूषकः—'यद्भवानाज्ञापयति' । (इति निष्क्रान्तः ।)

मातलिः—आयुष्मान्रथमारोहतु । (राजा रथारोहणं नाटयति ।)

(निष्क्रान्ताः सर्वे ।)

षष्ठोऽङ्कः ।

सप्तमोऽङ्कः।

(ततः प्रविशत्याकाशयानेन रथाधिरूढो राजा मातलिश्च।)

राजा—मातले, अनुष्ठितनिर्देशोऽपि भवतः सत्क्रियाविशेषादनुपयुक्तमिवात्मानं समर्थये।

मातलिः—(सस्मितम्।) आयुष्मन्, उभयसाध्यपरिणामं। कुतः,

प्रथमोपकृतं मरुत्वतः प्रतिपत्त्या लघु मन्यते भवान्।
गणयत्यवदानविस्मितो भवतः सोऽपि न सत्क्रियागुणान्॥१॥

राजा—मातले, गा मैवम्। न खलु मनोरथानामप्यभूमिर्विसर्जनावसरसत्कारः। मम हि दिवौकसां समक्षमभिलषितस्य

अन्तर्गतप्रार्थनमन्तिकस्थं जयन्तमुद्वीक्ष्य कृतस्मितेन।
आमृष्टवक्षोहरिचन्दनाङ्का मन्दारमाला हरिणा पिनद्धा॥२॥

मातलिः—किमिव नामायुष्मानमरेश्वरान्नार्हति! पश्य।

सुखपरस्य हरेरुभयैः कृतं त्रिदिवमुद्धृतदानवकण्टकम्।
तव शरैरधुना नतपर्वभिः पुरुषकेसरिणश्च पुरा नखैः॥३॥

राजा—अत्र खलु शतक्रतोरेव महिमा स्तुत्यः!

मिषन्ति कर्मसु महत्स्वपि यन्नियोज्याः
संभावनागुणमवेहि तमीश्वराणाम्।
किं वाऽभविष्यदरुणस्तमसां विभेत्ता
तं चेत्सहस्रकिरणो धुरि नाकरिष्यत्॥४॥

मातलिः—सदृशं तवैतत्। (श्लोकमन्तरमतीत्य।) अयुष्मन्, इतः

स्य नाकपृष्ठप्रतिष्ठितस्य सौभाग्यमात्मयशसः।

विच्छित्तिशेषैः सुरसुन्दरीणां वर्णैरमी कल्पलतांशुकेषु ।
विचिन्त्य गीतक्षममर्थजातं दिवौकसस्त्वच्चरितं लिखन्ति ॥५॥

राजा—मातले, असुरसंप्रहारोत्सुकेन पूर्वेद्युर्दिवमधिरोहता मया न लक्षितः स्वर्गमार्गः । कतमस्मिन्मरुतां पथि वर्तामहे ?

मातलिः— त्रिस्रोतसं वहति यो गगनप्रतिष्ठां
ज्योतींषि वर्तयति च प्रविभक्तरश्मिः ।
तस्य व्यपेतरजसः प्रवहस्य वायो
र्मार्गो द्वितीयहरिविक्रमपूत एषः ॥६॥

राजा—मातले, अतः खलु मत्प्राध्यान्तःकरणो ममान्तरात्मा प्रसीदति । (रथाङ्गमवलोक्य) मेघपदवीमवर्तीर्णौ स्वः ।

मातलिः—कथमवगम्यते ?

राजा— अयमरविवरेभ्यश्चातकैर्निष्पतद्भि-
र्हरिभिरचिरभासां तेजसा चानुलिप्तैः ।
गतमुपरि घनानां वारिगर्भोदराणां
पिशुनयति रथस्ते सीकरक्लिन्ननेमिः ॥७॥

मातलिः—सर्वथायुष्मान्स्वाधिकारभूमौ वर्तिष्यते ।

राजा—(अधोऽवलोक्य) मातलि वैभावसरणादाश्चर्यदर्शनः संवृत्तः मनुष्यलोकः । तथा हि ।

शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी
पर्णाभ्यन्तरलीनतां विजहति स्कन्धोदयात्पादपाः ।
संतानैस्तनुभावनष्टसलिला व्यक्तिं भजन्त्यापगाः
[illegible] ॥८॥

मातलिः—साधु दृष्टम् । (सबहुमानमवलोक्य) अहो उदाररमणीया पृथिवी !

राजा—मातले, कतमोऽयं पूर्वापरसमुद्रावगाढः कनकरसनिष्यन्दी सांध्य इव मेघपरिघः सानुमानालोक्यते ?

मातलिः—आयुष्मन्, एष खलु हेमकूटो नाम किंपुरुषपर्वतस्तपःसिद्धिक्षेत्रम् । पश्य ।

स्वायंभुवान्मरीचेर्यः प्रबभूव प्रजापतिः ।
सुरासुरगुरुः सोऽत्र सपत्नीकस्तपस्यति ॥९॥

राजा—तेन ह्यनतिक्रमणीयानि श्रेयांसि । प्रदक्षिणीकृत्य भगवन्तं द्रष्टुमिच्छामि ।

मातलिः—प्रथमः कल्पः ! (नाट्येनावतीर्णौ ।)

राजा—(सविस्मयम् ।)

उपोढशब्दा न रथाङ्गनेमयः प्रवर्तमानं न च दृश्यते रजः ।
अभूतलस्पर्शतयाऽनिरुद्धतस्त्वावतीर्णोऽपि रथो न लक्ष्यते ॥

मातलिः—एतावानेव शक्रतोरायुष्मतश्च विशेषः ।

राजा—मातले, कतमस्मिन्प्रदेशे मारीचाश्रमः ?

मातलिः—(हस्तेन दर्शयन् ।) पश्य !

वल्मीकार्धनिमग्नमूर्तिरुरसा संदष्टसर्पत्वचा
कण्ठे जीर्णलताप्रतानवलयेनात्यर्थसंपीडितः ।
अंसव्यापि शकुन्तनीडनिचितं बिभ्रज्जटामण्डलं
यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कबिम्बं स्थितः ॥११॥

मातलिः— संयतप्रग्रहं रथं कृत्वा) अनौ अदितिपरिवर्धितमन्दार-
वृक्षं प्रजापतेराश्रमं प्रविष्टौ स्वः ।

राजा—स्वर्गादधिकतरं निर्वृतिस्थानम् । अमृतह्रदमिवावगाढोऽस्मि ।

मातलिः—(रथं स्थापयित्वा) अवतरत्वायुष्मान् ।

राजा—(अवतीर्य) मातले, भवान्क्वयमिदानीम् ?

मातलिः—मयन्त्रितो मया रथः । वयमप्यवतराम: । (तथा कृत्वा)
इत, आयुष्मन् । (परिक्रम्य) दृश्यतामत्रभवतामृषीणां तपोवनभूमय: ।

राजा—ननु विस्मयादवलोकयामि !

प्राणानामनिलेन वृत्तिरुचिता मत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणुकपिशे धर्माभिषेकक्रिया ।
ध्यानं रत्नशिलातलेषु विबुधस्त्रीसंनिधौ संयमो
यत्काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिन्तपस्यन्त्यमी ॥१२॥

मातलिः—उत्सर्पिणी खलु महतां प्रार्थना ! (परिक्रम्य, आकाशं)
अये वृद्धशाकल्य किमनुतिष्ठति भगवान्मारीचः ? किं ब्रवीषि—'दाक्ष-
ण्या पतिव्रतास्वर्मर्षिकन्या वृद्धतपसौ मत्पौत्रीमहिषाये कथयती'ति ।

राजा—(कर्णं दत्त्वा) अये, प्रत्येष्यन्त्यावयोर्वचः खलु प्रस्तावः !

मातलिः—(राजानमवलोक्य) अभिमतसौभाग्यमूले नावद्यो ग्रा-
युष्मान् यावत्तिष्ठत्युत्ते निवेदयाम्यागत्येति भवामि ।

राजा—यथा भगवान्मन्यते ।

मातलिः—अयुष्मान् मारीचमागच्छ । (इति निष्क्रान्तः ।)

राजा—(निमित्तं सूचयित्वा ।)

मनोरथाय नाशंसे किं बाहो स्पन्दसे मृथा ।

नवध्ये)[1]मा खलु चापल्यं कुरु । कथं, गत एवात्मनः प्रकृतिम् ?

राजा—(कर्णं दत्त्वा) अभूमिरियमविनयस्य । को नु खल्वेष विधीयते ? (शब्दानुसारेणावलोक्य । सविस्मयम्) अये, को नु खल्वयमभिभूयमानस्तपस्विनीभ्यामबालसत्त्वो बालः ?

अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम् ।
प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति ॥१४॥

(ततः प्रविशति यथानिर्दिष्टकर्मा तपस्विनीभ्यां बालः ।)

बालः—[2]जृम्भस्व सिंह, दन्तांस्ते गणयिष्ये ।

प्रथमा—[3]अविनीत, किं नोऽत्रभवतो निर्विघ्नतपांसि सत्त्वानि विप्रकरोषि ?

द्वितीया—[4]सर्वदमन ! वर्धते ते संरम्भः । म्लाने खलु ऋषिजनेन सर्वदमन इति कृतमपत्यगोऽसि ।

राजा—किं नु खलु बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति मे मनः ?

अथवा—

अनपत्यता मां बलवत्यनुकम्पते ।

द्वितीया—[5]एषा खलु केसरिणी त्वां लङ्घयति, यत्तस्याः पुत्रकं न मुञ्चसि ।

बालः—(सस्मितम्) अहो बतीयः खलु भीतोऽस्मि ! (अधरं दर्शयति)

राजा **महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे ।**
स्फुलिङ्गावस्थया वह्निरेधापेक्ष इव स्थितः ॥१५॥

प्रथमा—[6]वत्स, एनं बालमृगेन्द्रं मुञ्च । अपरं ते क्रीडनकं दास्यामि ।

1. मा खलु बालत्वं करोहि । कथं गतः पुत्र आत्मनो प्रकृतिम् । 2. जृम्भ सिंह, दन्तांस्ते गणयिष्ये । 3. अविनीत, किं नोऽत्रभवतां निर्विघ्नतपांसि सत्त्वानि विप्रकरोषि ? 4. सर्वदमन ! वर्धते ते संरम्भः । म्लाने खलु ऋषिजनेन सर्वदमन इति कृतमपत्यगोऽसि । 5. एषा खलु केसरिणी त्वां लङ्घयति, यत्तस्याः पुत्रकं न मुञ्चसि । 6. वत्स, एनं बालमृगेन्द्रं मुञ्च ।

बालः—[1]कुत्र ? देह्येतत् । (इति हस्तं प्रसारयति ।)

राजा—कथं चक्रवर्तिलक्षणपरीक्षणेन धार्यते ? तथा ह्यस्य

प्रलोभ्यवस्तुप्रणयप्रसारितो विभाति जालग्रथिताङ्गुलिः करः ।
अलक्ष्यपत्रान्तरमिद्धरागया नवोपमा भिन्नमिवैकपङ्कजम् ॥१६॥

द्वितीया—[2]सुव्रते, न शक्य एष बालो वाचामात्रेण विरमयितुम् । मम्मक्त्वम् । मदीय उटजे मार्कण्डेयस्यर्षिकुमारस्य वर्णचित्रितो मयूरोऽस्ति । तमस्यापहर ।

प्रथमा—[3]तथा । (इति निष्क्रान्ता ।)

बालः—[4]अनेनैव तावत्क्रीडिष्यामि । (इति तापसीं विलोकय हसति ।)

राजा—स्पृहयामि खलु दुर्ललितायास्मै !

आलक्ष्यदन्तमुकुलाननिमित्तहासं-
रव्यक्तवर्णरमणीयवचःप्रवृत्तीन् ।
अङ्काश्रयप्रणयिनस्तनयान्वहन्तो
धन्यास्तदङ्गरजसा मलिनीभवन्ति ॥१७॥

तापसी—[5]भवतु । न मामयं गणयति । (पार्श्वमवलोकय) कोऽत्र ऋषिकुमारकाणाम् ? (राजानमवलोक्य) भद्रमुख, एहि तावत् । मोचय मामेनं दुर्मोक्षस्नेहग्रहेण क्रियमाणं बालमृगेन्द्रकम् ।

राजा—(उपगम्य । सस्मितम्) अयि भोः, महर्षिपुत्र !

---

1. कहिं ? देहि णं । 2. भव्वदे, ण सक्को एसो वाआमत्तेण विरमाविदुं । भव्वं तुमं । ममकेरए उडए मक्कण्डेयस्स इसिकुमारअस्स वण्णचित्तदो मिअपोदओ चिट्ठदि । तं मे उवहर । 3. तह । 4. हंजणा एव्व दाव कीलिस्सं । 5. [illegible] णहि दाव । मोएदि हरिणा

क्षमाश्रमविरुद्धवृत्तिना संयमः किमिति जन्मतस्त्वया ।
क्वसंश्रयसुखोऽपि दृश्यते कृष्णसर्पाशिशुनेव चन्दनः ॥१८॥

तापसी—[1]भद्रमुख, न खल्वयमृषिकुमारः ।

राजा—आकारसदृशं चेष्टितमेवास्य कथयति । स्थानप्रत्ययात्तु
[2]अयमेवंदर्शिनः । (यथाभ्यर्थितमनुतिष्ठन्बालस्पर्शमुपलभ्य, आत्मगतम् ।)

अनेन कस्यापि कुलाङ्कुरेण स्पृष्टस्य गात्रेषु सुखं ममैवम् ।
कां निर्वृतिं चेतसि तस्य कुर्याद्यस्यायमङ्गात्कृतिनः प्ररूढः ॥१९॥

तापसी—(उभौ निर्वर्ण्य) आश्चर्यमाश्चर्यम् !

राजा—आर्ये, किमिव ?

तापसी—[3]अस्य बालकस्य नेऽपि संबाधिन्याकृतिरिति विस्मि-
तास्मि । [4]सापि नेऽतिलोमः संवृत्त इति ।

राजा—(बालकमुपलालयन्) ननेन्मुनिकुमारोऽयमथ कोऽस्य
कथंदेशः ?

तापसी—[5]पुरुवंशः ।

राजा—(आत्मगतम्) कथं कान्तयो मम ! अतः खलु मदनुकारिण-
मनभिज्ञा मां मन्यन्ते । अस्त्येवतत्पौरवाणामन्त्यं कुलव्रतम् ।

भवनेषु रसाधिकेषु पूर्वं क्षितिरक्षार्थमुशन्ति ये निवासम् ।
नियतैकपतिव्रतानि पश्चात्तरुमूलानि गृहीभवन्ति तेषाम् ॥२०॥

(प्रकाशम्) न पुनरात्मगत्या मनसोऽपि विषयः !

1. भद्रमुख, ण खु अअ इसिकुमारओ । 2. अच्छरिअं ! अच्छरिअं ! 3. 'इमस्स
[illegible] : निसंबाधिणी आकिदि त्ति विम्हिदम्हि । अपरिचयदरसविदे अप्पडिलोमो
संवुत्तो' त्ति । 4 पडिलोमो ।

तापसी—'यथा भद्रमुखो भणति। अप्सरःसंबन्धेनास्य जनन्यत्र देवगुरोस्तपोवने प्रसूता।

राजा—(अपवार्य) हन्त! द्वितीयमिदमाशाजननम्। (प्रकाशम्) अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी?

तापसी—'कस्तस्य धर्मदारपरित्यागिनो नाम संकीर्तयिष्यति?

राजा—(स्वगतम्) इयं खलु कथा मामेव लक्ष्यीकरोति। यदि तावदस्य शिशोर्मातरं नामतः पृच्छामि! अथ वानार्यः परदारव्यवहारः।

(प्रविश्य मृन्मयमूरुहस्ता) **तापसी**—'सर्वदमन, शकुन्तलावणं प्रेक्षस्व

बालः—(सदृष्टिक्षेपम्) 'कुत्र वा मम माता!

उभे—'नाममाहात्म्येन वञ्चितो मा भूत्सर्वदमनः!

द्वितीया—'वत्स, अस्य दुष्टसामयूरकस्य रूपं पश्येति मणिबन्धं गृह्णाति।

राजा—(आत्मगतम्) किं वा शाकुन्तलेऽपत्ये मानुराख्या? सन्ति पुनर्नामधेयमात्रेण्यानि। अपि नाम मृगतृष्णिकेव नाममात्रप्रलापिनी मे विषादाय कल्पते!

बालः—'माः, रोचते म एष भद्रमयूरः। (दन्तकोडनकमादत्ते।

प्रथमा—(विलोक्य, सोद्वेगम्) अहो! रक्षाकरण्डकमस्य मणिबन्धे न दृश्यते!

---

1. अह भद्दमुहो भणादि। अच्छरासंबन्धेण अम्हं जणणी एत्थ देवगुरुणो तवोवणे पसूदा। 2. जो एसो अज्जाए अणारिओ णाम संकित्तिदुं चिन्तिस्सदि? 3. सव्वदमण, मउन्दलावण्णं पेक्ख। 4. कहिं वा मे अज्जू? 5. णामसाहिज्जेण वञ्चिदो माउवच्छलो। 6. वच्छ, अम्हं मित्तसामोरअस्स रम्मत्तणं देक्खदि मणिबन्धं मि। 7. अज्जाए, सोहणं मे एदं भद्दमोरअं। 8. अम्हाणं! रक्खाकरण्डअं

राजा—अलमावेगेन। नन्विदमस्य सिंहशावविमर्दोत्परिभ्रष्टम्!

(इत्यादातुमिच्छति।)

उभे—[1]मा खल्वेतदवलम्ब—कथं गृहीतमनेन! (इति विस्मयाद्धुरो-निहितहस्ते परस्परमवलोकयतः।)

राजा—किमर्थं प्रतिषिद्धाः स्थः?

प्रथमा-[2]शृणोतु महाराजः। एतावगालिनो नामौषधिरस्य जात-कर्मसमये भगवता मारीचेन दत्ता। एतां किल मातापितरावात्मानं च वर्जयित्वाऽपरो भूमिपतिनां न गृह्णाति।

राजा—अथ गृह्णाति?

प्रथमा—[3]ततस्तं सर्पो भूत्वा दशति।

राजा—भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया?

उभे—[4]अनेकशः।

राजा—(सहर्षम्। आत्मगतम्) कथमिव संपूर्णमपि मे मनोरथं नाभिनन्दामि! (इति बालं परिष्वजते।)

द्वितीया—[5]सुव्रते, एहि। इमं वृत्तान्तं निवर्तयाम्बायै शकु-न्तलायै निवेदयावः। (इति निष्क्रान्ते।)

बालः—[6]मुञ्च माम्। यास्यामि मातुः सकाशं गमिष्यामि।

राजा—पुत्रक, मयैव सहैव मातरमभिनन्दिष्यसि।

1. मा खलु एदं अवलम्बिअ—कधं गहीदं णेण। 2. सुणादु महाराओ। एसा गालिदा णाम ओसही इमस्स जादकम्मसमए भअवदा मारीएण दिण्णा। एदं किल मादापिदरो अप्पाणं च वज्जिअ अवरो भूमिवदिं ण गेण्हादि। 3. तदो णं सप्पो भूअ दंसइ। 4. अणेअसो। 5. सुव्वदे, एहि इमं वुत्तन्तं णिवेदअम्हाकुडाए सउन्दलाए [illegible]

बालः—'मम खलु तातो दुष्यन्तः ! न त्वम् ।

राजा—(सस्मितम्) एष विवाद एव प्रत्याययति !

(ततः प्रविशत्येकवेणीधरा शकुन्तला ।)

शकुन्तला—'विकारकालेऽपि प्रकृतिस्थां सर्वदमनस्यौषधिं श्रुत्वा न म आशासीदात्मनो भागधेयेषु । अथ वा, यथा मानुमत्याख्यातं तथा संभाव्यत एतत् ।

राजा—(शकुन्तलां विलोक्य) अये, मेघमलिनभवर्ती शकुन्तला; यथा

वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः ।
अतिनिष्करुणस्य शुद्धशीलं मम दीर्घं विरहव्रतं बिभर्ति ॥२१॥

शकुन्तला—(पश्चात्पार्श्ववर्तिनं राजानं दृष्ट्वा) 'न खल्वार्यपुत्र इव ।

ततः क एष इदानीं कृतरक्षामङ्गदं हारकं मे गात्रसंस्पर्शेन दूषयति ।

बालः—(मातरमुपेत्य) 'मातः, एष कोऽपि पुरुषो मां पुत्र इत्याश्लिष्यति ।

राजा—प्रिये, कौतुकमपि मे त्वया प्रयुक्तमनुकृतपरिणामं संवृत्तं, यदहमिदानीं त्वया प्रत्यभिज्ञातमात्मानं पश्यामि ।

शकुन्तला—(आत्मगतम्) हृदय, समाश्वसिहि ! समाश्वसिहि ! परित्यक्तमत्संगानुकम्पितापि दैवेन । आर्यपुत्र स्वागतम् !

राजा—प्रिये ।

स्मृतिमिन्नमोहतमसो दिष्ट्या प्रमुखे स्थितासि मे सुमुखि ।
उपरागान्ते शशिनः समुपगता रोहिणी योगम् ॥२२॥

1. मम खलु तातः [illegible] दमनस्य औषधिं सृष्टवान् [illegible] आशासीत् न संभावयामि । 3. [illegible] खिद्यमानस्य दारुणं वचनं [illegible] । 4. अतः, एषा [illegible] प्रत्यभिज्ञानं [illegible] । 5. विधात, समस्तानां [illegible]

शकुन्तला—[1]जयतु जयत्वार्यपुत्रः—(इत्यर्धोक्ते बाष्पकण्ठी विरमति ।)

राजा—[2]सुन्दरि ?

बाष्पेण प्रतिषिद्धेऽपि जयशब्दे जितं मया ।
यत्ते दृष्टमसंस्कारपाटलोष्ठपुटं मुखम् ॥२३॥

बालः—[3]माता, किमयं पिता ?

शकुन्तला—[4]वत्स, [5]मामेवापि पृच्छ ।

राजा—(शकुन्तलायाः पादयोः प्रणिपत्य ।)

सुतनु हृदयात्प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसः संमोहो मे तदा बलवानभूत् ।
प्रबलतमसामेवंप्रायाः शुभेषु हि वृत्तयः
सहजमपि शिरम्यन्धः सद्यः पुनोत्यहिशङ्कया ॥२४॥

शकुन्तला—[6]उत्तिष्ठ आर्यपुत्रः । सूनं मे सुचरितप्रतिबन्धकं पुराकृतं नवसु द्विसेषु परिणामभिन्नमासादितेन सानुक्रोशोऽप्यार्यपुत्रो मयि विरमः संवृत्तः ।

(राजोत्तिष्ठति ।)

शकुन्तला—अथ केनायमुपालब्धस्तो दुःसहाभ्ययं जनः ?

राजा—उद्भ्रान्तविषादजन्यया हृदयिष्यामि ।

माहात्म्यया सुतनु पूर्वमुपेक्षितस्ते
यो बद्धबिन्दुरधरं परिबाधमानः ।
तावदाकुटिलपक्ष्मविलग्नमग्र
बाष्पं प्रमृज्य विगतानुशयो भवेयम् ॥२५॥ (यथोक्तमनुतिष्ठति)

1. [illegible] 2. [illegible], किं [illegible] ? 3. [illegible], हे माअदेआ अच्छेहि । 4. [illegible] 5. [illegible] पुराकिदं तेसु दिअहेसु परिणामभिण्णं आसादिदेण, [illegible] 6. [illegible]

शकुन्तला—(नाममुद्रां दृष्ट्वा)[1] आर्यपुत्र, इदं तदङ्गुलीयकम् !

राजा— अत्मादङ्गुलीयोपलम्भान्खलु स्मृतिरुपलब्धा !

शकुन्तला—'विषमं कृतमनेन यत्तः र्यपुत्रस्य प्रत्ययकाले दुर्लभमासीत्

राजा—तेन हि ऋतुसमवायचिह्नं प्रतिपद्यतां लता कुसुमम् ।

शकुन्तला—'नाम्य विश्वसिमि । आर्यपुत्र एवैनद्धारयतु ।

(ततः प्रविशति मातलिः ।)

मातलिः—दिष्ट्या धर्मपत्नीसमागमेन पुत्रमुखदर्शनेन चायुष्मान्वर्धते!

राजा—अभूतसंपादिनस्वादुफलो मे मनोरथः । मातले, न खलु विदितोऽयमाखण्डलेन वृत्तान्तः स्यात् ?

मातलिः—(सस्मितम्) किमाश्चर्याणां परोक्षम् ? एतत्तावदायुष्मान् । भगवान्मारीचस्तं दर्शनं वितरति ।

राजा—शकुन्तले, अवलम्ब्यतां पुत्रः । त्वां पुरस्कृत्य भगवन्त द्रष्टुमिच्छामि ।

शकुन्तला—'निह्रेम्यार्यपुत्रेण सह गुरुसमीपं गन्तुम ।

राजा—अप्याचरितकथमभ्युदयकालेषु । एष्येहि । सर्वं परिक्रामति

(ततः प्रविशत्यदित्या सार्धमासनस्थो मारीचः ।)

मारीचः—(राजानमवलोक्य) दाक्षायणि !

पुत्रस्य ते रणशिरस्ययमग्रयायी
दुष्यन्त इत्यभिहितो भुवनस्य भर्ता ।
चापेन यस्य विनिवर्तितकर्म जातं
तत्कोटिमत्कुलिशमाभरणं मघोनः ॥२६॥

---

1. अज्ञातेन, [illegible] ! [illegible] पथप्रकाले दुर्लभ आसीत् । [illegible]

2. विनिश्चिनोति अज्ञातेन सह गमनमेव वन्तं ।

अदितिः—[1]संभावनीयानुभावाभ्याकृतिः !

मातलिः—अयुष्मन्, एतौ पुत्रप्रीतिपिशुनेन चक्षुषा दिवौकसां पितरावायुष्मन्तमवलोकयतः ; तावुपसर्प ।

राजा—मातले !

प्राहुर्द्वादशधा स्थितस्य मुनयो यत्तेजसः कारणं
भर्तारं भुवनत्रयस्य सुषुवे यद्यज्ञभागेश्वरम् ।
यस्मिन्नात्मभवः परोऽपि पुरुषश्चक्रे भवायास्पदं
द्वन्द्वं दक्षमरीचिसंभवमिदं तत्स्रष्टुरेकान्तरम् ॥२७॥

मातलिः—अथ किम् ।

राजा—(उपगम्य) उभाभ्यामपि वामभिनियोज्यो दृष्यन्तः प्रणमति ।

मारीचः—वत्स, चिरं जीव ! पृथिवीं पालय !

अदितिः—[2]वत्स, अप्रतिरथो भव !

(ततः पुत्रसहिता शकुन्तला पादयोः पतति ।)

मारीचः—वत्से !

आखण्डलसमो भर्ता जयन्तप्रतिमः सुतः ।
आशीरन्या न ते योग्या पौलोमीसदृशी भव ॥२८॥

अदितिः—[3]जाते, भर्तुर्बहुमता भव ! अयं च दिर्घायुर्वत्सक उभयकुलनन्दनो भवतु ! उपविशत । (सर्वे प्रजापतिमभित उपविशन्ति ।)

मारीचः—(एकैकं निर्दिशन्)

दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान् ।
श्रद्धा वित्तं विधिश्चेति त्रितयं तन्समागतम् ॥२९॥

1. संभावणीआणुभावा आआिई ... [illegible] होहि । 3. जादे, भत्तुणो बहुमदा होहि । अअं । दीहाउ. वच्छओ उहअकुलणन्दणो होदु ! उवविसह ।

राजा—भगवन्, प्रागभिप्रेतसिद्धिः ; पश्चाद्दर्शनम् ! अतोऽपूर्वः खलु वोऽनुग्रहः ! कुतः ;

उदेति पूर्वं कुसुमं ततः फलं घनोदयः प्राक्तदनन्तरं पयः ।
निमित्तनैमित्तिकयोरयं क्रमस्तव प्रसादस्य पुरस्तु संपदः ॥३॥

मातलिः—एवं विधातारः प्रसीदन्ति !

राजा—भगवन्, इमामाजाकरीं वो गान्धर्वेण विवाहविधिनोपयम्य कस्यचित्कालस्य बन्धुभिरार्तानां स्मृतिशैथिल्यादित्यादिशल्यपराद्धोऽसि तत्रभवतो युष्मत्सगोत्रस्य कण्वस्य । पश्चादङ्गुलीयकदर्शनादुत्पन्नं तदिदं तरमवगतोऽहम् । तच्चित्रमिव मे प्रतिभाति !

यथा गजो नेति मनःस्थरूपे तस्मिन्नपक्रामति संशयः स्यात् ।
पदानि दृष्ट्वा तु भवेन्प्रतीतिस्तथाविधो मे मनसो विकारः ॥

मारीचः—वत्स, अत्यात्मापराधशङ्क्या ! ममोऽहोऽपि तवानुपपन्नः । श्रूयताम् ।

राजा—अवहितोऽस्मि ।

मारीचः—यदद्वाऽपरस्त्रीपरिग्रहाख्यानवैकल्यां शकुन्तलामादाय मेनका हेमकूटमुपगता तेन ध्यानादवगतोऽसि दुहितुः शापादियं तपस्विनी महर्षेरपचारिणी त्वया प्रत्यादिष्टा, नान्यथेति । स चायमङ्गुलीयकदर्शनावसानः !

राजा—(सोच्छ्वासम्) एष वचनीयान्मुक्तोऽस्मि !

शकुन्तला—(स्वगतम्) 'दिष्ट्याऽकारणप्रत्यादेशी नार्यपुत्रः' संवृत्तः पुनः शप्तमात्मानं स्मरसि ! अथ वा प्रायो मया न हि शापो

विरहशून्यहृदयया न विदितः । अतः सखीभ्यां संदिष्टास्मि भर्तुरङ्गुलीयकं दर्शयितव्यमिति ।

मारीचः—वत्से, विदितार्थोस्मि । तदिदानीं महधर्मचारिणं प्रति न त्वया मन्युः कार्यः । पश्य ।

पादमि प्रतिहता स्मृतिरोधरूक्षे भर्तर्यपेततमसि प्रभुता तवैव ।
या न मूर्छति मलोपहतप्रसादे शुद्धे तु दर्पणतले सुलभावकाशा ॥

राजा—यथाह भगवान् ।

मारीचः—वत्स, कच्चिदभिनन्दितस्त्वया विधिवदस्मामिरनुष्ठित-नामधर्मा पुत्र एष शाकुन्तलेयः ।

राजा—भगवन, अत्र खलु मे वंशप्रतिष्ठा । (इति बालं हस्तेन गृह्णाति)

मारीचः—तथाभाविनमेनं चक्रवर्तिनमवगच्छतु भवान् । पश्य ।

रथेनानुद्धातस्तिमितगतिना तीर्णजलधिः
पुरा सप्तद्वीपां जयति वसुधामप्रतिरथः ।
इहायं सत्त्वानां प्रसभदमनात्सर्वदमनः
पुनर्यास्यत्याख्यां भरत इति लोकस्य भरणात् ॥३३॥

राजा भगवता कृतमभिनन्दनं मनोरथमस्मन्नयमाशास्महे ।

अदितिः—'भगवन अम्मा, दुहितृमनोरथसंपत्तेः कण्वोऽपि तावदनभिज्ञः क्रियताम । दुहितृवत्सला मेनकैवोपचरन्ती तिष्ठति ।

शकुन्तला—(आत्मगतम्) 'मनोरथः खलु मे भणितो भगवत्या ।

मारीचः—तपःप्रभावात्प्रत्यक्षं सर्वमेव तत्रभवतः ।

[1]यदो मए य हि णावो दिव्वेणणिति आगासेण तिदो । अदो एहीह संदिट्ठ[2]ल्लि मेणाए अणुण्णाअ अम्हेहि त्ति ।

1. भजव, इमाए दुहिदुमणोरहसंपत्तीए मेणा हि णाम मुणिकण्णीए कण्णआ । दुहिदवच्छला मेणआ इह एव्व उपचरन्ती चिट्ठदि । 2. मणोरहो खलु मे भणिदो भजवदीए ।

राजा—अतः खलु मम नातिक्रुद्धो मुनिः !

मारीचः—तथाप्यसौ प्रियमस्माभिः श्रावयितव्यः ! कः कोत्र भोः !

(प्रविश्य) **शिष्यः**—भगवन्, अयमस्मि ।

मारीचः—गालव, इदानीमेव विहायसा गत्वा मम वचनात्तव भवते कण्वाय प्रियमावेदय यथा पुत्रवती शाकुन्तला तच्छापनिवृत्तौ स्मृतिमता दुष्यन्तेन प्रतिगृहीतेति ।

शिष्यः—यदाज्ञापयति भगवान् । (इति निष्क्रान्तः ।)

मारीचः—वत्स, त्वमपि स्वापत्यदारसहितः सप्तपुराखण्डलस्य रथमास्थाय ते राजधानीं प्रतिष्ठस्व ।

राजा—यदाज्ञापयति भगवान् ।

मारीचः—अपि च ।

तव भवतु विडौजाः प्राज्यवृष्टिः प्रजासु
त्वमपि वितनयज्ञो स्वर्गिणः प्रीणयस्व ।
युगशतपरिवर्तानेवमन्योन्यकृत्यै-
र्नयतमुभयलोकानुग्रहश्लाघनीयैः ॥३४॥

राजा—भगवन्, यथाशक्ति श्रेयसे यतिष्ये ।

मारीचः—वत्स, किं ते भूयः प्रियमुपहरामि ?

राजा—अतः परमपि प्रियमस्ति ! यदिह भगवान्प्रियं कर्तुमिच्छति तर्हीदमस्तु ! (भरतवाक्यम्।)

प्रवर्ततां प्रकृतिहिताय पार्थिवः सरस्वती श्रुतमहतां महीयताम् ।
ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः ॥

(निष्क्रान्ताः सर्वे ।)

श्लोकसूची (INDEX TO VERSES)

अतिदाक्षिण्यकलितव०	VI	20	अहन्यहन्यात्मन एव	VI	26
अतः परीक्ष्य कर्तव्यं	V	21	आत्मगुल्यमो मता	VII	5
अथः किमन्यदागाः	I	19	आचार इत्यवोचेतन	V	
अथाक्रान्ता वर्मणि०		11	आजन्मनः शाठ्यमौशिजिना	V	
अनवरतनवनु ष्यधिकान्त०		1	आताम्रहरिणपाणुर	V	
अनाघ्रातं पुष्पं		1	आतम्महरि अपण्डुर		
अनिशमपि मकरकेतुः		1	आ पर्यन्तोपाण्डुरा	i	
अनेकनारिणि पृथिवी		10	आस्वाद्यन्तमृतमिव	VII	
अनुमतगमना अकृतज्ञा	IV	10	इतः प्रत्याहारान्नवनलिनमनग०	VI	
अनेनाभ्यर्थितनयना	I	20	इदं किलाव्याजमनोहरं	I	17
अनेन धन्यापि कुलाङ्गनेति	VII	14	इदमनन्यपरायणमन्यथा	III	17
अन्तःपातिनमांसलक्ष्यम्	VII	2	इदमाशिशिरैर्नवनाथानां	III	11
अन्तर्हिते शशिनि सर्व	IV	3	इदमुपनतमेव	V	13
अपरिक्षतकोमलस्य	III	22	ईषदीषच्चुम्बितानि ईर्षामि चुम्बि आई	I	4
अभिजनवतो भर्तुः	IV	19	उत्पक्ष्मणोर्नयनयोः	II	13
अभिनवमधुलोलुपो पाटलाव मधुलोलुपो		1	उत्सृज्य कुसुमशयन	III	20
अभिमुखे मयि संहृतमाक्षिणा	II	11	उदेति पूर्वं कुसुमं	VII	30
अभ्यर्थनामिव स्मातः	V	11	उद्वेलितदमकलका उद्गालिअदलमकलका	IV	12
अभ्युन्नता पुरस्तान	III	6	उन्नमितैकभ्रूलतम्	III	13
अमी वेदि पांसवः	IV	5	उपोढशब्दा न रथाङ्गनेमयः	VII	10
अय म त निष्ठति	III	1	एकैकमत्र दिवसे	VI	12
अयमरविवरेभ्यः	VII	7	एवमाश्रमविरुद्धवृत्तिना	VII	18
अर्थो हि कन्या परकीय एव	IV	22	एष त्वामभिनवकण्ठ०	VI	27
अर्धपीतस्तनं मातुः	VII	11	एषा कुसुमनिषण्णा	VI	19
अलंशयं क्षत्रपरिग्रहक्षमा		20	एषापिप्रियेण विना एसा वि पिएण विणा	IV	16
अस्मात्परं वत यथाश्रुति	VI	25			
अस्मान्साधु विचिन्त्य	IV	17			

औत्सुक्यमात्रमवसाययति	v	6	तत्साधुकृतसंधानं	i	11
कः पौरवे वसुमतीं०	i	23	तदेषा भवतः कान्ता	v	
कथं नु तं बन्धुरकोमलाङ्गुलि	vi	13	तपति तनुगात्रि	iii	15
क्व कथा बाणसंधाने	iii	1	तव कुसुमशरत्व	iii	3
काम प्रत्यादिष्टा	v	31	तव न जाने हृदय तुज्झ ण आणे हिअअ	iii	11
कामं प्रिया न सुलभा	ii	1	तव भवतु विदूरजाः	vii	31
कार्या सैकतलीनहंसमिथुना	vi	17	तव सुरभिमुखस्य	vi	11
का स्विदवगुण्ठनवती	v	13	तवास्मि गीतरागेण	i	
किं शातलः कुसुमिनोऽभिमतः	iii	15	तस्याः पुष्पमयी		
किं कृतकायेन	v	18	तीव्राघातप्रतिहतमवः०		
किं नाम्नि तिनामुपोढ०	v	11	तुरगसुहतमस्था	i	
कृतो धर्मक्रियाविघ्नः	v	14	त्रिभोतमं वर्तन यो	vii	6
कमुदान्येव शशाङ्कः	v	28	त्वन्मनः केवलं	vi	
कृत न चरणापिनद्धनं	vi		त्वमिव मया चतुरं त्वमि मा चतुरं		
कृतावः शरण्या हरिणा	vi		त्वमहता प्राग्रसरः	i	
कृतार्थमभिलाषमन्तरेण	v	20	दर्भोदरेण चरणा	ii	
कृत्वा यो मेखलादाम०	ii	17	दर्शनमुग्धमनुभवतः	i	
कृष्णसारः परोक्षमन्मथो०	ii		दिष्टया शकुन्तला	i	10
क्षौम केनचिदाहतेन			दुष्यन्तेनाहितं तेजो०	i	
गच्छति पुरः शरीरं			न खलु न खलु		
गाढोत्का मार्दवा	ii	6	नागरिकतो गुरुजनो नागरिकस्त्रो गुरुजनो		
ग्रीवाभङ्गाभिरामं			नियमयतो विभागप्रस्थितान्	i	
चलापाङ्गां दृष्टि	i	21	नीवाराः शुकगर्भकोटर०	i	1
चित्रे निवेश्य परि०	ii	9	नैतच्चित्र यदयमुदधि०	ii	1
चूतानां चिरनिर्गता	vi	1	परिग्रहबहुत्वेऽपि	iii	
जन्म यस्य पुरोर्वंशे	i	11	पातुं न प्रथमं व्यवस्यति	iv	
ज्ये तपसो वीर्य	iii	9			

पृष्टा जनेन समदुःखसुखेन	iii	9
प्रजाः प्रजाः स्वा इव	v	5
प्रजागरार्तिखलीभूतः	vi	22
प्रत्यादिष्टविशेषमण्डनविधिः	vi	6
प्रथमं सारङ्गाक्ष्या	vi	7
प्रथमोपकृतं मरुत्वतः	vii	1
प्रलोभ्यवस्तुप्रणय०	vii	16
प्रवर्ततां प्रकृतिहिताय	vii	35
प्राणानामनिलेन	vii	12
प्राह्नुर्दिशथा स्थितस्य	vii	27
बाष्पेण प्रतिषिद्धेऽपि	vii	23
भवनेषु रमाधिकेषु	vii	20
भर्तारि नम्रास्तरवः	v	12
भव हृदय साभिलाषं	i	25
भानुः सकृत्कनकभङ्ग इव	v	1
भूत्वा चिराय नृपतिर्वनभाग०	iv	20
मनोरथाय नाशंसे	vii	13
मय्येव विभ्रमणदाक्षिण्य०	v	23
महतमेतज्जगो बीजं	vii	
महाभागः काम	v	10
मानुषीषु कथं वा	i	23
मुक्तेषु रश्मिषु निराश्रय०		
मुनिसुताप्रणयस्मृतिरोधिना	vi	5
मुहुरङ्गुलिमवृताधरोष्ठ	iii	23
मूढः स्यामहमेषा वा	v	29
मेदश्छेदकृशोदरं	ii	5
मोहान्मया सुतनु	vii	25
यथा गजो नेतुं	vii	31
यदालोके सूक्ष्मं व्रजति	i	9
यदि यथा वदति	v	27
यद्यदि वर्तिष्यते	ii	13
यद्यत्साधु न चित्रे	vi	14
ययातेरिव शर्मिष्ठा	iv	7
यस्य त्वया व्रणविरोपण०	iv	14
यात्येकतोऽस्तशिखरं	iv	2
या सृष्टिः स्रष्टुराद्या	i	1
यास्यत्यद्य शकुन्तलेति	iv	6
येन येन वियुज्यन्ते	vi	23
यो हनिष्यति वध्यं त्वां	vi	28
रथेनानुद्धतनेमिना०	vii	33
रम्य द्वेष्टि यथा पुरा	vi	5
रम्याणि वीक्ष्य मधुरांश्च	v	2
रम्यान्तरः कमलिनी०	iv	11
रम्यास्तपोधनानां	i	13
वल्मीकाग्रनिमग्नमूर्तेर०	vii	11
वसने परिधूसरे वसाना	vii	21
वाचं न मिश्रयति	i	25
विचिन्तयन्ती यमनन्य०	iv	1
विच्छित्तिरेषा सुरसुन्दरीणा	vii	5
वेधास्तथा हि किमनया	i	21
व्यपदेशमाविलयितुं	v	21
शकुन्तलापरिजनाश्रमवृक्षबन्धुः	iii	5
शमप्रधानेषु तपो०	ii	7
शममेवर्षयो मम शोकः	iv	21
शान्तमिदमाश्रमपदं	i	15
शापादस्मि प्रतिहता	vii	32
शुद्धान्तदुर्लभमिदं	i	16
शुश्रूषस्व गुरून्कुरु	iv	18
शैलानामवरोहतीव	vii	8
संरोपितेऽप्यात्मनि	vi	24
सख्युरते स किल	vi	30
संकल्पितं प्रथममेव	iv	13

मनोभिपि ज्ञानिकुलैक०	v	17	सुभगसलिलावगाहाः	i	3
संदष्टकुसुमशयना	iii	16	सुरयुवतिगंभवं	ii	5
सरसिजमनुविद्धं	i	18	स्तन-जघनोशीरं	iii	7
सहजे किल यद्विनिन्दनं	vi	1	स्त्रीणामशिक्षितपटुत्व०	v	22
सहजे किल जे विणिन्दए			स्निग्धं वीक्षितमन्यतोऽपि	ii	2
साक्षात्प्रियामुपगता०	vi	16	स्मर एव तापहेतुः	iii	10
सा निन्दन्ती स्वानि	v	30	स्मृतिभिन्नमोह०	vii	22
सायंतने भवनकर्मणि	iii	25	स्मरतामावनिमात्र०	i	27
सिध्यन्ति कर्मसु	vii	1	स्वप्नो नु माया नु	vi	10
सुखयत्यस्य हरेरमय	vii	3	स्वसुखनिरभिलाषः	v	7
सृजतु हृदयात्प्रत्या०	vii	21	स्वायंभुवान्मरीचेर्गः	vii	9
			स्विन्नाङ्गुलिविनिवेशो	vi	17

PUBLICATIONS

OF THE

SANSKRIT LITERATURE SOCIETY

सुलभ-साहित्य-माला—

		Rs
1.	Pratijna-Yaugandharayana of Bhasa	
	with an exhaustive Introduction Notes,	
	Do Sanskrit Translation, Appendices	1
	Do Special Edition	1
2	Abhijnana-Sakuntalam of Kalidasa	
	with Introduction, Notes,	1
3.	Do English Translation ..	1
	Nos. 2 & 3 (Text & Translation) together	2
	Do Special Edition	3

For copies, please apply to

1. **K. Narayanaswamy Iyengar Esq.,**

   221, III Road, Chamrajpet, Bangalore City.

2. **Messrs. V. S. Sobbiah & Sons,**